सचन्देनेति । चन्दनाम्बुना चन्दनरसेन सहितं सचन्दनाम्बु तच्च यद्व्यजनं तालवृन्तं तस्मादुद्भव उत्पत्तिर्येषा तेऽनिला समीरास्तै । हारयष्टिभिर्मुक्तावलीभि सहितानां स्तनमण्डलानां कुचानामर्पणै दानैरालिङ्गनैरिति यावत् । वल्लक्या वीणया सहिता काकलय सूक्ष्मध्वनय 'तान' इति संगीतशास्त्रपरिभाषाम् गीतस्य गानस्य निस्वनै ध्वनयश्चेति द्वन्द्व । तै सुप्त इव निद्रित इव मन्मथ प्रबोध्यते । यथा सुप्तो नृप प्रभाते गानादिना प्रबोध्यते तद्वद्ग्रीष्मेऽनाभूतो मदन सुप्त इति तर्कयित्वा तत्र बोधनमेभिरुपायै क्रियते । प्रकृतस्य व्यजनानिलादेर्मदनप्रबोधनोत्प्रेक्षणादुत्प्रेक्षालङ्कार । " संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् " इति लक्षणात् ॥ ८ ॥

सितेषु हर्म्येषु निशासु योषिताम्
सुखप्रसुप्तानि मुखानि चन्द्रमा ।
विलोक्य नियतं भृशमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥ ९ ॥

सितेष्विति । सितेषु सुधाधवलितेषु हर्म्येषु धनिकगृहेषु योषितां कामिनीनां सुखं प्रसुप्तानि निद्रितानि मुखानि वदनानि चिरं बहुकालं नियतं निरन्तरं निशासु वीक्ष्य दृष्ट्वा । अत्र सुखप्रसुप्तानि निशासु चन्द्रमा सहितः तत्र तासां मुखान्यभिव्यज्यन्ते सूच्यते ।

---

१ 'समुद्गतस्वेद' २ B 'निवेशयन्ते' ३ 'चन्दनेन्दु' ४ B अर्पितै' ५ G N D 'विबोध्यते' J B 'प्रबुध्यत' ६ 'सुखानि सुखानि' ७ G D N J 'भूत भृशम' 'निर्निमेषम्' ८ 'एव'

निशाक्षये रात्र्यवसाने चंद्रमा उत्सुक उत्कण्ठित सन् ह्रियेव लज्जयेव पाण्डुता पाण्डुरत्वं याति । अत्र प्रातश्चन्द्रस्य स्वाभाविकी पाण्डुरता कामिनीनिष्कलंकमुख-दर्शनजेत्युत्प्रेक्षणादुत्प्रेक्षालंकार । लक्षणं पूर्वमुक्तमेव । अत्र च ह्रियेनेति पाठ एवोत्प्रेक्षानुकूल समीचीनश्च। ह्रियैवेतिपाठोऽसाधु । द्वितीयचरण नूनं मुखामिति पाठा पेक्षया निर्यन्त्रणमिति पाठ साधु ॥९॥

असह्यवातोद्धतरेणुमण्डला
प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः
प्रियावियोगानलदग्धमानसैः ॥ १० ॥

असह्येति । प्रियाया कान्ताया वियोगो विरह एवानलस्तेन दग्धं भस्मी-भूतं मानस मनो येषा तै प्रवासिभि पान्थै । असह्य सोढुमशक्यो यो वातो वायुस्तेनोद्धतम् उपरिक्षिप्तं रेणुमण्डलं धूलिचकं यस्या सा । प्रचण्डेन सूर्यस्यात-पेन प्रकाशेन तापिता पीडिता दग्धप्राया मही द्रष्टुमपि वीक्षितुमपि न शक्यते। अत्र वियुक्तप्रवासिजनस्य महीदर्शनासामर्थ्यसमर्थनात्काव्यलिंगमलंकार । " समर्थ-नीयस्यार्थस्य काव्यलिंग समर्थनम् " इति तल्लक्षणात् ॥ १० ॥

मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालव. ।
वनान्तरे तोयमिति प्रधाविता
निरीक्ष्य भिन्नाञ्जनसंनिभं नभः ॥ ११ ॥

मृगा इति । प्रचण्ड प्रखरो य आतप सूर्यकिरणास्तैस्तापिता पीडिता महत्या तृषा पिपासया परिशुष्काणि तालूनि काकुदानि येषा ते मृगा हरिणा भिन्नाञ्जनेन कज्जलेन संनिभं सदृशं नभ आकाशं निरीक्ष्य अवलोक्य वनान्तरे अन्यस्मिन्वने प्रधाविता शीघ्रं गता । कर्मणोऽधिकरणत्वविवक्षया वनान्तरे इत्यत्र सप्तमी । भ्रांतिमानलंकार । तल्लक्षणंतु " भ्रान्तिमानन्यसंवित्तुल्य दर्शने " इति ॥ ११ ॥

सविभ्रमैः सस्मितजिह्मवीक्षितै
विलासवत्यो मनसि प्रवासिनाम् ।
अनङ्गसंदीपनमाशु कुर्वते
यथा प्रदोषाः शशिचारुभूषणा. ॥ १२ ॥

सविभ्रमैरिति । शशीव चन्द्र इव चारूणि मनोहराणि भूषणान्यलंकारा यासा ता विलासवत्य सुंदर्य । विभ्रमेण विलासेन सहितै. स्मितेनेषद्धास्येन सहितै-र्जिह्मै कुटिलैर्वीक्षितैरपाङ्गावलोकनैरारात् यावत् प्रगल्भिना ताभिर्युवतिभि

1 J. 'वातोद्धत.' 2 'प्रधाविता.' 3 'जिह्मसाधतैः.' 4 D. N. 'प्रवासिनाम्.'

न्दतमेपर्वाणां यूना मनांसि अनंगसंदीपनं कामोद्दीपनं कुर्वते । इत्याह । यथा मदनैर चारु सुंदरं भूषणं येषां ते प्रदोषा रजनीमुखानि । सुन्दरोऽयं प्रदीपन-वलेक्य कामिनां कामो वर्धते । प्रवासिनामिति पाठोऽपि दुन्दते । तान्यप्रदोषैरपि तेऽपि कामपीडिता भवन्तीति भावः । उपमानोपमेयधर्मवाचकाना चतुर्णाम् दुग्धानादपूर्णोपमालंकारः ॥ १२ ॥

रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांसुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन् मुहुः
फणी मयूरस्य तले निषीदति ॥ १३ ॥

रवेरिति । रवेः सूर्यस्य मयूखैः किरणैर्भृशमत्यन्तमभितापितः पीडितः पथि मार्गे तप्तपांसुभिः सूर्यकिरणतप्तैः पांसुभिर्धूलिभिः विदह्यमानः । सूर्यकिरणैः पीडितः पांसुभिस्तु ज्वलित इत्यर्थः । एतेनातपापेक्षया धूलेर्दाहकत्वातिशयो व्यज्यते । उक्तं चान्यत्र " रविरपि न दहति तादृग् यादृग् संदहति वालुकानिकरः " । अवाङ्मुखोऽधोमुखः । जिह्मा कुटिला गतिर्गमनं यस्य । तिर्यग्गमनस्वभावत्वादेव सर्पस्येति भावः । मुहुर्वारंवारं श्वसन् फणी सर्पो मयूरस्य बर्हिणस्य च्छायायाम् इत्यर्थः । तले तच्छरीरच्छायायामिति यावत् । निषीदति अवतिष्ठते । भीतिकारणे मयूरे विद्यमानेऽपि भीत्यजननाद्विशेषोक्त्यलंकारोऽत्र व्यङ्ग्यः । तल्लक्षणं तु " विशेषोक्तिरखण्डेषु कारणेषु फलावचः " इति ॥ १३ ॥

तृषा महत्या हतविक्रमोद्यमः
श्वसन्मुहुर्दूरविदारिताननः ।
न हन्त्यदूरेऽपि गजान्मृगेश्वरो
विलोलजिह्वश्चलिताग्रकेसरः ॥ १४ ॥

तृषेति । महत्या दृढया तृषा पिपासया हतो नाशितो विक्रमस्य पराक्रमस्योद्यम उद्योगो यस्य सः । मुहुर्वारंवारं श्वसन् दूरं विदारितं विस्फारितमाननं मुखं येन सः । विलोला चञ्चला जिह्वा रसना यस्य सः । केसराग्रमग्रकेसरम् । आहिताग्न्यादिगणत्वादग्रशब्दस्य पूर्वनिपातः । अथवा " द्वन्द्वतत्पुरुषयोर्गुणगुणिनोर्भेदाभेदाभ्याम् " इति वामनसूत्रानुसारेण तत्पुरुषः समासः । " अग्रं मेऽग्रहस्तादुपभाजनम् " इति नासिकादिवत् इव । केचित् " अग्रिके च प्रधाने च प्रथमे चाभिधेयवत् " इति मेदिनीकोशानुसारेण प्राधान्यबोधकाग्रशब्दस्य कर्मधारयमाहुः । चलिताः कम्पिता अग्रकेसराः सटाग्राणि यस्य स मृगेश्वरः केसरी अदूरेऽपि स्थितानिति शेषः । गजान् द्विरदान् न हन्ति न विदारयति । विशेषोक्तिरलंकारः । लक्षणं पूर्वमुक्तम् ॥ १४ ॥

१ ' पन्नः '. २ B. K. ' भृशं '. ३ ' मृगम '. ४ B. मृगाधिपः '. ५ ' चलितस्वकेसरः '.

विपन्नमीनं द्रुतभीतसारसम् ।
परस्परोत्पीडनसंहतैर्गजैः
कृतं सरः सान्द्रविमर्दकर्दमम् ॥ १९ ॥

समुद्धतेति । परस्परोत्पीडनसंहतैः परस्परस्योत्पीडनाय नाशाय संहतैर्मिलितैर्गजैर्हस्तिभिः सरः समुद्धृतानि उत्पाट्य दूरं क्षिप्तान्यशेषाणि संपूर्णानि मृणालानां बिसानां जालानि यस्मात्तत् तथाकृतम् । अपिच विपन्ना विपदभिभूता मीना मत्स्या यस्मिंस्तत् । "विपन्नं विपदापन्ने" इति मेदिनी । द्रुताः पलायिता भीताश्च सारसाः पक्षिविशेषा यस्मिंस्तत् । सान्द्रो निबिडो विमर्देन युद्धेन कर्दमः पङ्को यस्मिन् तथा कृतं विहितम् । गजैः परस्परनाशाय प्रवृत्तैः सरसि तथा जन्यमारब्धं येन मृणालजालानि बहिर्गमितानि मत्स्या मृताः सारसाः पलायिताः कर्दमश्च सान्द्रो जातः ॥ १९ ॥

रविप्रभोद्भिन्नशिरोमणिप्रभो
विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषाकुलः ॥ २० ॥

रवीति । रवेः सूर्यस्य प्रभया कान्त्योद्भिन्ना बहिर्निर्गता शिरोमणेः फणास्थरत्नस्य प्रभा कान्तिर्यस्य सः । विलोलेन चपलेन जिह्वाद्वयेन लीढ आस्वादितो मारुतः पवनो येन सः विषमेव अग्निर्विषाग्निः । अथवा विषम् अग्निर्दावानलः सूर्यातपश्चैतैस्तापितः पीडितः । अथवा विषं चाग्निश्च विषाग्नी विषाग्नी इव सूर्यातपस्तेन तापितः पीडितोऽनएव तृषाकुलः फणी मण्डूककुलं भेकसमूहं न हन्ति न नाशयति भक्षणायेति शेषः ॥ २० ॥

सफेनलालावृतवक्त्रसंपुटं
विनिर्गतालोहितजिह्वमुन्मुखम् ।
तृषाकुलं निःसृतमद्रिगह्वराद्
गवेषमाणं महिषीकुलं जलम् ॥ २१ ॥

सफेनेति । फेनेन डिंडीरेण सहित (फेस इति महाराष्ट्रभाषायाम्) लालया स्यादन्या आवृतं व्याप्तं वक्त्रसंपुटं मुखसंपुटं यस्य तत् । 'डिंडीरोऽब्धिकफः फेनः' '' सृणिका स्यन्दिनी लाला'' इति चामरः । विनिर्गता बहिरागता आलोहिता आसमन्ताल्लोहितवर्णा जिह्वा रसना यस्य तत् । उन्मुखम् ऊर्ध्वानि मुखानि यस्य तत् । तृषाकुलं पिपासाव्याप्तमतएव सलिलमुद्दिश्य गवेषमाण-

१ 'विनिपन्नमीनाद्रुतभीतसारसम्'　२ 'उत्पीडित'　३ 'क्षतम्'　४ 'पीत'.　५ 'तृषार्दित'.　६ 'भाद्रुतम्'　७ D J. N 'लो ?दन'　८ D G N J 'ध्वनि गृता'

मन्विष्यन् महिषीकुलम् अतिगह्वरात् पर्वतकंदरान्निःसृतं निर्गतं भवतीति शेषः ॥ २१ ॥

पटुतरदवदाहोत्प्लुष्टशष्पप्ररोहाः
परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापक्षीणतोयाः समन्ताद्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥ २२ ॥

पटुतरेति । अतिशयेन पटुः पटुतरो यो दवो वनाग्निस्तस्य दाहेन ज्वलनेन उत्प्लुष्टा दग्धाः शष्पाणां तृणानां प्ररोहा अंकुरा येषु ते । परुषः कठोरो यो पवनस्तस्य वेगेनोत्क्षिप्तानि उपरि क्षिप्तानि संशुष्काणि पर्णानि येषु ते । दिनकरस्य सूर्यस्य परितापेनातपेन क्षीणानि नष्टानि तोयान्युदकानि येषु ते वनान्ता वनप्रान्तभागा उच्चैः उन्नतस्थलतो वीक्ष्यमाणा अवलोक्यमाना भयं विदधति कुर्वन्ति । अथवा उच्चैरिति भयविशेषणं महतीं भीतिमित्यर्थः । मालिनीवृत्तम् "ननमयययुतेयं मालिनी भोगिलोकैः" इति तल्लक्षणात् ॥ २२ ॥

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥ २३ ॥

श्वसितीति । शीर्णानि पतितानि पर्णानि पत्राणि येषां तेषु द्रुमेषु तिष्ठतीति विहगवर्गः पक्षिसमूहः श्वसिति । दीर्घश्वासं दीर्घं श्वासोच्छ्वासं करोति । क्लान्तं म्लानं कपिकुलं वानरयूथः अद्रेः पर्वतस्य निकुञ्जं लतागृहं याति वानराणां तादृशभावात्क्लमोपशमनाय ते लतागृहमाश्रयन्ते । तोयमुदकमिच्छन् गवययूथः पशुविशेषाणां गोसदृशानां "गवा" इति भाषायां प्रसिद्धानां समूहः सर्वतः इतस्ततो भ्रमति पर्यटति । अजिह्मम् अकुटिलं शरभाणां मृगविशेषाणां कुलं समूहः कूपाद्वाप्या अम्बु उदकं प्रोद्धरति गृह्णाति । शरभास्तु काश्मीरेषु सिंहवैरिण इति प्रसिद्धा अष्टापदा मृगविशेषाः । शरभवर्णना कालिदासेनैव मेघसंदेशे दृश्यमानास्तीति "तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्" इति मेघे बोधितः ॥ २३ ॥

विकचनवकुसुम्भस्वच्छसिन्दूरभासा
प्रबलपवनवेगोद्भूतवेगेन तूर्णम् ।

तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥ २५ ॥

विकचेति । विकचं प्रफुल्लं नवं नूतनं कुसुम्भमिव महारजनमिव स्वच्छमच्छं सिन्दूरं रक्तचूर्णं तस्य भा इव भा कान्तिर्यस्य तेन । अथवा विकचनवकुसुम्भं स्वच्छसिन्दूरं च तयोर्भा इव भा यस्य तेन । ' सिन्दूरं रक्तचूर्णके " इति मेदिनी । प्रबलस्य प्रचण्डस्य पवनस्य वायोर्वेगेनोद्भूत उत्पादितो वेगो यस्य तेन । वाताधिक्ये ह्यग्निर्वर्धते । तरूणां वृक्षाणां विटपाः शाखाश्च लतानामग्राणि च तेषामालिङ्गन आश्लेषे व्याकुलेन समासक्तेन पवनेन वनाग्निना भूमयो भुवः प्रदेशा दिशि दिशि प्रतिदिशं तूर्णं सम्प्रति परिदग्धा कृष्णीकृता ॥ २४ ॥

ध्वनति पवनवृद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः ॥ २५ ॥

ध्वनतीति । पवनेन वातेन वृद्ध एधितो दवाग्निर्दावानलः पर्वतानां दरीषु गुहासु ध्वनति निनदति । ज्वलतीति पाठापेक्षया ध्वनतीति पाठः सम्यक् । शुष्काः जलरहिता वंशानां वेणूनां स्थल्योऽकृत्रिमभूमयस्तासु पटुनिनादः पटुर्व्यक्तो निनादः स्वनो यस्य सः स्फुटति विकसति । तद्वत् तृणानां मध्ये क्षणेन क्षणादेवाल्पकालादेव लब्धाधिगता वृद्धिर्येन स प्रसरति । प्रान्ते प्रान्तभागे लग्नः स मृगवर्गं ग्लपयति पीडयति व्याकुलयतीत्यर्थः ॥ २५ ॥

बहुतर इव जातः शाल्मलीनां वनेषु
स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखादुत्पतन्प्रांशुवृक्षाद्
भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥ २६ ॥

बहुतरेति । अग्निः शाल्मलीनां पिच्छिलावृक्षाणां " सावरि " इति महाराष्ट्रभाषायाम् । वनेषु बहुतरः अतिशयेन जात इव प्रादुर्भूत इव द्रुमाणां वृक्षाणां कोटरेषु वृक्षविवरेषु कनकगौरः कनकमिव सुवर्णमिव गौरः स्फुरति

१ D J N ' तरु , ' तनुविकच ' २ G N ' ज्वलति ' ' धर्णति ' ३ B पवनविद्ध ' ४ ' पर्वतान्तदरीषु ' ५ ' स्फुरति ' ६ K पटुनिनाद D J G N ' पटुनिनादं ' ७ D ' तृणमध्यम ' ८ B K दाहयति ', ' तापयति ' ९ ' यूथम ' ' वृन्दम ' १० ' द्विपाढ्य ' ११ बहुतर इव दान १२ ' एर्दीं ' १३ D G N ' परिणतदलशाखानुत्पतन्प्रांशुवृक्षान ' ' परि ' ' परिणतदलशाखा उत्पतन् गुल्मवृक्षान् १४ ' दहति ' १५ ' सर्वदा '

विलसति । परिणतानि पक्वानि दलानि पत्राणि शाखाश्च यस्य तस्माद् वृक्षादाशु द्रदिति उत्पतति ऊर्ध्वं गच्छति । अथवा परिणतानि दलानि शाखा तथाभूता शाखा यस्य तस्मात् । पक्वो वृक्षोऽग्निना तूर्णं दह्यत इति भाव । ऊर्ध्वगतश्च पवनेन धृत कम्पितो वनान्ते वनप्रान्ते सर्वत आसमन्ताद् भ्रमति गतागत करोति ॥ २६ ॥

गजगवयमृगेन्द्रा वन्हिसतप्तदेहा
सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदादाशु निर्गत्य कक्षाद्
विपुलपुलिनदेशां निम्नगामाश्रयन्ते ॥ २७ ॥

गजेति । वन्हिना वनाग्निना सतप्ता देहा येषा ते गजगवयमृगेन्द्रा गजो द्विपो गवयो गोसदृशो वनवृषभो मृगेन्द्र सिंहश्च द्वन्द्वभाव कलह विहाय त्यक्त्वा " द्वन्द्व रहस्ये कलहे तथा मिथुनयुग्मयो " इति मेदिनी । सुहृद इव सखाय इव समेता एकीभूता. हुतवहस्याग्ने परिखेदात्त्रासात् कक्षात् वनात् निर्गत्य नि ष्क्रम्य । " कक्षो वीरुधि दोर्मूले वन्छे शुष्कतृणे वने " इति मेदिनी । विपुल पृथुल पुलिनदेश सैकतप्रदेशो यस्यास्ता निम्नगा नदीमाश्रयन्ते ॥ २७ ॥

कमलवनचिताम्बुः पाटलामोदरम्य
सुखसलिलनिषेक सेव्यचंद्रांशुहार ।
व्रजतु तव निदाघ कामिनीभि समेतो
निशि सुललितगीते हर्म्यपृष्ठे सुखेन ॥ २८ ॥

प्रियासबोधमधुर सरमुपसहरति । हे सुललितगाते । सुललितमतिमनो हर गीत गान यस्यास्तत्सबुद्धौ तथाविधे हे प्रिये । कमलाना सरोरुहाणा वनेन निवासेन चित्त व्याप्तम् अम्बु यस्मिन् । " वन नपुसक नीरनिवासालयकानने " इति मेदिनी । यत्तु वनेन समुदायेनेत्यर्थ स प्रमाणाभावादनादरणीय । पाटलाना कोऽप्रपुष्पाणाम् आमोदेन सुवासेन रम्यो मनोहर । पाटलानामामोदो रम्यो य- स्मिनित्यपव्याख्यान विशेषणपूर्वनिपातत्वाद्दुष्टमाहे । सुख सुखदायक सलिल निषेक सलिलेन निषेक स्नान सलिले निषेको वा यस्मिन् । एतेन " सुभगस लिलावगाहा " इति स्मारितम् । सेव्याश्चन्द्रस्यांशव किरणा हारा मुक्तामा लाश्च यस्मिन् । अथवा चद्रांशव एव हारा चद्रांशुहारा सेव्याश्चद्रांशुहारा. य स्मिन् स । निदाघो ग्रीष्मर्तु कामिनीभि सखीभि समेतो युक्तो रात्रौ प्रा सादतले चद्रशालाया सुखेन तव गच्छतु । त्व ग्रीष्मकाले सखीभि सह सौधतले

१ J 'समन्तात्' २ 'शत्रुभावम्' ३ 'निगम्य' ४ J. G. N 'देशात्' ५ D J G N 'सविशन्ति' ६ 'दल' ७ B 'जाल' ८ 'समेतम्' ९ B. 'गीते'

गायन्त्या रात्रिः सुखेन नयेति भावः । गायनासक्तयैव कालो यापनीय इति सूचयितुमेव सुललितगाते इति संबोधनम् ॥ २८ ॥

इति श्रीकालिदासकृतऋतुसंहारे प्रथमः सर्गः ॥ १ ॥

...नानि । इदं च खण्डकाव्यं तल्लक्षणं तु साहित्यदर्पणे “ खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि यत् ” इति । अत्र च महाकाव्यैकदेशऋतुवर्णनस्य विहितत्वात् । अत्र च प्रतिसर्गमन्ते वृत्तभेदः स च सर्गलक्षणानुरूपो यथा तत्रैव “ एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकै ”रित्युक्तत्वादिति दिक् ॥

इति महाकविश्रीकालिदासकृतऋतुसंहारव्याख्यायां बालबोधिन्यां प्रथमः सर्गः ॥ १ ॥



द्वितीयः सर्गः

वर्षावर्णनम् ।

अथ ग्रीष्मकालादनन्तरमुपस्थितं वर्षाकालमुपवर्णयन्नाह ।

ससीकराम्भोधरमत्तकुञ्जर—
स्तडित्पताकोऽशनिशब्दमर्दलः ।
समागतो राजवदुद्धतद्युति—
र्घनागमः कामिजनप्रियः प्रिये ॥ १ ॥

ससीकरेति । हे प्रिये राजवन्नृपवदुद्धता उन्नता द्युतिः कान्तिर्यस्य स घनानामागमः उद्गमोऽथवा घनानां मेघानामागमो यस्मिन् स वर्षर्तुः समागतः सम्यक्तयोपस्थितः । राजानं वर्षाकालं च विशिनष्टि । शीकरैरम्बुकणैः सहितोऽम्भोधरः पयोधर एव मत्तः कुञ्जरो गजो यस्य स तथोक्तः । मत्तजलधररूपिणं कुञ्जरमारूढ इति तात्पर्यार्थः । नृपपक्षे ससीकराम्भोधर इव मत्तकुञ्जरो यस्य सः । मेघवर्षाकालरूपं समारूढमागत इति यावत् । तडिदेव सौदामिन्येव पताका यस्य । नृपपक्षे तडिदिव पताका यस्य । विद्युदिव दीप्तिमत्पताक इति भावः । अशनिशब्दो वज्रध्वनिरेव मर्दलो वाद्यविशेषो यस्य सः । 'ढक्का' इति महाराष्ट्रभाषायाम् । पक्षेऽशनिरिव शब्दो यस्य तादृशो मर्दलो वाद्यविशेषो यस्य सः कामिजनप्रियः कामिनां जनानां कामुकानां प्रियः पक्षे कामिनां नागरिकाणां प्रियः । नृपा हि नगरप्रवेशावसरे धनं वर्षयन्ति च याचकाग्रे इत्यर्थः नृपो यथा तुलनीयोऽनया हस्तिनमारूढः पताका पुष्कलवाद्यघोषसह प्रवेशं च तद्वदयं घनोऽपीति भावः । एवं तु पूर्ववदुपमान्तरम् ॥ १ ॥

नितान्तनीलोत्पलपत्रकान्तिभिः
क्वचित्प्रभिन्नाञ्जनराशिसन्निभैः ।
क्वचित्सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः ॥ २ ॥

वर्णाश्च वर्तन्ते तद्वदुच्चयाममध्याः समन्ताच्छुभ्रवर्णाश्च ते । वाग्भटोऽपि गर्भिणीस्तनौ पीनौ श्वेतान्तौ कृष्णचूचुकाविति । घनैर्मेघैर्व्योम समन्तत आसमन्तात्समाचितं व्याप्तम् ॥ २ ॥

तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं बहुधारवर्षिणो[1]
बलाहकाः श्रोत्रमनोहरस्वनाः ॥ ३ ॥

तृषाकुलैरिति । तृषाकुलैः पिपासापीडितैश्चातकपक्षिणां कुलैः समुदायैः प्रयाचिताः प्रार्थिताः । चातकानां मेघैकजीवनत्वादिति भावः । तोयभरेणोदकाधिक्येनावलम्बन्तेऽधोगच्छन्ति ते तोयभरावलम्बिनः । बह्व्यो धारा यस्यां क्रियायां यथा स्यात्तथा बहुधारं वर्षन्ति ते । नववारिवर्षिण इति पाठोऽक्लिष्टः । श्रोत्रस्य श्रवणेन्द्रियस्य मनोहरः स्वनो गर्जितं येषां ते । बलाहका वारिवाहका मेघा इति यावत् । पृषोदरादित्वात्साधु । मन्दं प्रयान्ति जलभारान्मन्दं मन्दं चरन्ति ॥ ३ ॥

बलाहकाश्चाशनिशब्दमर्दलाः[2]
सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायकै[3]
स्तुदन्ति चेतः प्रसभं प्रवासिनाम् ॥ ४ ॥

बलाहका इति । च शब्दोऽप्यर्थे । अपि च । अशनिशब्दः पविशब्दो मर्दलो वाद्यविशेषो येषां ते । तडिद्विद्युद्गुणो मौर्वी यस्य तत्सुरेन्द्रचापमिन्द्रधनुर्दधतो धारयन्तो बलाहका मेघाः सुतीक्ष्णानां तिग्मानां धाराणां पतनान्येवोग्राः प्रखराः सायका[4] नाराचास्तैः करणैः प्रवासिनां वियुक्तानां पान्थानां चेतो मानसं प्रसभं सबलात्कारं तुदन्ति पीडयन्ति । " मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे " इति च मेघसंदेशस्थं पद्यमप्यनेन स्मारितम् । अत्र च प्रस्तुतमेघकृतप्रवासिजनपीडावर्णनादेवाप्रस्तुतमारकृतशरप्रहारपरिस्फूर्त्या समासोक्तिरलंकारो रूपकमूलक इत्यवधेयम् । " समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् " इति तल्लक्षणात् ॥ ४ ॥

प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः[5]
समाचिता प्रोत्थितकन्दलीदलैः[6] ।
विभाति शुक्लेतररत्नभूषिता[7]
वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥ ५ ॥

1 B. 'बहुवारिवर्षिणः' K. 'नववारिवर्षिणः'. 2 B. G. 'भीषणाः'. K. 'भूषणाः'. 3 B. 'सतीक्ष्ण'. 'सुतीव्र'. 4 B. 'सायकाः'. 5 B. 'निभस्य'. 'स्तनिभि.'. 'शुभग्रः'. 6 'प्रोद्दित'. 7 B. 'कार्ष्ण्यं वरत्नभूषिता' 'कृष्णेतररत्नभूषिता'.

प्रभिन्नेति । प्रभिन्नाः छिन्ना ये वैदूर्या अमिनोपला रत्नविशेषास्तैर्निभैः सदृशैः । प्रभिन्ना उल्लसन्त इति व्याख्याने तु भिन्नमणिविशेषकान्त्यनवबोधमूलकम् । तृणाङ्कुरैर्नवप्ररोहैः प्रोत्थितान्युद्गतानि कंदलीना पर्णाग्रालोद्भववनस्पतिविशेषाणा "कंदिणी" इति महाराष्ट्रभाषायाम् प्रथिमानां दलानि पर्णानि तैः । "आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्" इत्यनेनैव कविना वर्षाकाले कन्दलीनामुत्पत्तिः सूचिता मेघसंदेशे । इन्द्रगोपैरिन्द्रगोपाख्यैः क्षुद्रैः कृष्णचिह्नैः कीटैश्च समाचिता व्याप्ता क्षितिः पृथ्वी शुक्लैर्रक्तैर्मणिभिरलंकृता वराङ्गनेव लावण्यवती कामिनीव विभाति शोभते । अलंकारैरलंकृता युवतिरिव पृथ्वी विभातीति भावः । यत्तु वराङ्गना वेश्येति व्याख्यानं तद्वाराङ्गनेति भ्रान्त्या शब्दार्थापरिज्ञानेन वा बोद्धव्यम ॥ ५ ॥

सदा मनोज्ञं सुरतोत्सवोत्सुकं
विकीर्णविस्तीर्णकलापशोभितम् ।
ससम्भ्रमालिंगनचुम्बनाकुलं
प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ॥ ६ ॥

सदेति । सदा सर्वदा मनोज्ञं रमणीयं सुरतोत्सवे रतिक्रीडायामुत्सुकमुत्कण्ठितं विकीर्णः प्रसारितो विस्तीर्णो महान् कलापो बर्हं तेन शोभितमलंकृतं संभ्रमेण सहितं यथा तथा ससंभ्रममालिङ्गने चुम्बने चाकुलं व्याप्तं बर्हिणां मयूराणां कुलं समूहोऽद्य वर्षाकाले प्रवृत्तं प्रारब्धं नृत्यं नर्तनं येन तत्प्रवृत्तनृत्यं जातम् । मेघमालोकय मयूरा नृत्यन्तीति प्रसिद्धमेव । मनोज्ञाम्बुदनादमित्यत्र तु मनोज्ञो मधुरोऽम्बुदस्य मेघस्य नादो गर्जितं तस्मिन्नुत्सुकमित्यर्थः । अन्ये तु पाठभेदाः सुगमाः ॥ ६ ॥

निपातयन्त्यः परितस्तटद्रुमान्
प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः सुदुष्टा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥ ७ ॥

गतम र । सुरुप्रा क्षिप्त स्य दुर्गाणि । न चापिम्य दृ । न यथा चान नेत्रेषा कर्पूरतनं स्तकुलम्यानि नाय नाश गेतापगादे निर्गि य नार नवमेघि तूर्णं गर्मेस्तम्भान नचटि न दृष्ट्वा गापि मर्दितवैगनजिरद्वैमदिरमा त्ववनुना नागरसप्रम न नि भन । मृद्गतगैरिरि वेगपतौर मर्दिताना योनामिमान ।योनपरिरिरापत्र । ग जोपम गा अगभन दुतुभयो नरर ॥ ७ ॥

तृणोत्करैरुद्गतकोमलाङ्कुरै-
श्चितानि नीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्यानि हरन्ति मानसं
विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥ ८ ॥

तृणो करैरति । नीलैर्नीलवर्णैर्हरिणीनां मृगाङ्गनानां मुखैः क्षतानि खण्डितानि नरद्रुमा निर्गता कोमला मृदवोऽङ्कुरा यस्मिन् येषां तैस्तृणोत्करैस्तृणराशिभिश्चितानि व्याप्तानि । स्यात् पुञ्जराशी तूत्कर इत्यमरः ... उद्गतानि नवो पल्लवानि पत्त्राणि येषां तैर्द्रुमैर्विभूषितान्यलङ्कृतानि वन्यानि विन्ध्यस्य इमानि वनान्यरण्यानि मानसान्तःकरणं हरन्त्याकर्षयन्ति । यथा ... उपवनभूमयो मनोहरतद्रूपैरलङ्कृतानि ... नम इति भावः । अथवा क्षतानि हरिणी ... नैः । निष्ठान्तरं ... ताम्यादिश्वा ... निपात । तेन च ' यस्य तया नख रोपण महदाता तैः ... मुखे ... इति ... पद्य सम गितम ॥ ८ ॥

विलोलनेत्रोत्पलशोभिताननै
र्मृगैः समन्तादुपजातसाध्वसैः ।
समाचिता सैकतिनी वनस्थली

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा
घनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः
प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ १० ॥

अभीक्ष्णमिति । अभीक्ष्णं पुनःपुनरुच्चैर्महान्तं शब्दं विदधता पयोमुचा पयांसि मुञ्चन्ति त्यजन्ति तेन मेघेन घनान्धकारीकृतशर्वरीषु घनो निबिडोऽन्धकारो यासु ता घनान्धकाराः न घनान्धकाराः अघनान्धकाराः घनान्धकाराः इव सम्पद्यन्ते घनान्धकारीकृताः शर्वर्यो रजन्यः तासु । सततनलदद्रूपाद्धृतासु गतिविच्छिर्यर्थ । तडितां विद्युतां प्रभाः कान्तिभिर्दर्शिता मार्गभूमयो यासां ता अभिसारिकाः स्त्रियो रागात् प्रेम्णा प्रयान्ति गच्छन्ति । "कान्तार्थिनी तु या याति सङ्केतं साभिसारिका" इत्यमरः । महान्धकारे प्रेम्णा विना कामिन्यो रमणसङ्केतं गच्छन्ति । रति शोकवेलाया कुमारसम्भवे 'रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः । वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः' ... मदनेन ... प्रेम्णैव विशेष । सुतीक्ष्णसुन्दरिलिपि ... । १० ॥

पयोधरैर्भीमगभीरनिःस्वनै—
स्तडिद्भिरुद्वेजितचेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान्
परिष्वजन्ते शयने निरन्तरम् ॥ ११ ॥

पयोधरैरिति । भीमो भयङ्करो गभीरो गभीरो निःस्वनो निनादो येषां तैः पयोधरैर्मेघैस्तडिद्भिर्विद्युद्भिर्भृशमत्यन्तमुद्वेजितं भीतं चेतोऽन्तःकरणं यासां ता योषितः स्त्रियः कृतापराधानपि कृतोऽपराधोऽन्याङ्गनासेवनादिरूपोऽपराधो यैस्तान् प्रियान् रमणान् शयने शय्यायां निरन्तरं ... परिष्वजन्ते आलिङ्गन्तीत्यर्थः । भुजङ्ग... मेघनिर्घोषा कामिन्योऽपराधं विस्मृत्य रमणमालिङ्गन्ते इति भावः ॥११॥

विलोचनेन्दीवरवारिबिन्दुभि—
र्निषिक्तबिम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः
स्थिता निराशाः प्रमदाः प्रवासिनाम् ॥ १२ ॥

१ B K 'मुहुर्मुहुः' २ B 'घनाम्' '६ नताम' ध्वनिते' 'स्वनताम्' ३ B 'पयोमुचाम्'. ४ B K 'घनान्धकारावृत'. ५ 'पुष्प परा स्त्रिय' ६ B 'निःस्वनै' ७ B 'घनाङ्के' B. 'स्तनद्भि'. ८ B 'कृता' ९ 'कृता'

[illegible] । [illegible] दुःखारण [illegible] । [illegible] [illegible] [illegible] [illegible] सुतृणं [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] । [illegible] ॥ ७ ॥

तृणोत्करैरुद्गतकोमलाङ्कुरै-
श्चितानि नीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्यानि हरन्ति मानसं
विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥ ८ ॥

तृणेति । [illegible] मृगस्त्रीणां मुखैः [illegible] [illegible] तृणराशिभिश्चितानि व्याप्तानि । [illegible] [illegible] [illegible] मानसं [illegible] । यथा [illegible] मनोहरं [illegible] इति भावः । [illegible] [illegible] [illegible] ॥ ८ ॥

विलोलनेत्रोत्पलशोभिताननै-
र्मृगैः समन्तादुपजातसाध्वसैः ।
समाचिता सैकतिनी वनस्थली
समुत्सुकत्वं प्रकरोति चेतसः ॥ ९ ॥

विलोलेति । [illegible] नेत्राण्येवोत्पलानि कमलानि तैः शोभितानि भूषितान्याननानि मुखानि येषां तैः । उपजातं समुत्पन्नं साध्वसं भयं येषां तैर्मृगैर्हरिणैः समन्तात् [illegible] समाचिता [illegible] सैकतिनी सैकतं पुलिनं [illegible] यस्य सा वनस्थली वनस्याऽरण्यस्य [illegible] समुत्सुकत्वं [illegible] [illegible] । [illegible] समुत्सुकं भवति चेत इति भावः ॥ ९ ॥

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा
घनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः
प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ १० ॥

अभीक्ष्णमिति । अभीक्ष्णं पुनः पुनरुच्चैर्ध्वनता महान्तं शब्दं कुर्वता पयोमुचा पयांसि मुञ्चतीति तेन मेघेन घनान्धकारीकृतशर्वरीषु घनो निबिडोऽन्धकारो यासु ता घनान्धकाराः न घनान्धकारा अघनान्धकाराः अघनान्धकारा घनान्धकारा इव सम्पद्यमाना घनान्धकारीकृतास्ताः, शर्वर्यो रात्रयश्च तासु । सन्ततान्धकारयुक्तास्वपि रात्रिष्वित्यर्थः । तडितां विद्युतां प्रभाभिः कान्तिभिर्दर्शिता मार्गभूमयो यासां ता अभिसारिकाः स्त्रियो रागात्प्रेम्णा प्रयान्ति गच्छन्ति । 'कान्तार्थिनी तु या याति संकेतं साभिसारिका' इत्यमरः । महान्धकारे प्रेम्णा विना कामिन्यो रमणसकाशं न गच्छन्ति । यदि शोकवेगात्ता कुमारसम्भवे "रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः । वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः" इत्यत्र मदनेन कामिन्या कविना प्रकटितम् । तत्र तु मदनेन तत्र गमनं, अत्र तु प्रेम्णेति विशेषः । मुक्ताक्षणमुच्चैरित्यपि पाठः सम्यक् तेन न गमितम्य इत्येतदवलम्ब्यते ॥ १० ॥

पयोधरैर्भीमगभीरनिःस्वनै–
स्तडिद्भिरुद्वेजितचेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान्
परिष्वजन्ते शयने निरन्तरम् ॥ ११ ॥

पयोधरैरिति । भीमो भयङ्करो गभीरो गम्भीरो निःस्वनो निर्घोषो येषां तैः पयोधरैर्मेघैस्तडिद्भिर्विद्युद्भिश्च भृशमत्यन्तमुद्वेजितं खेदितं चेतोऽन्तःकरणं यासां ता योषितः स्त्रियः कृतः आगतोऽपराधोऽन्यासक्त्यादिरूपोऽपराधो यैस्तान् प्रियान् रमणान् शयने शय्यायां निरन्तरं यथा स्यात्तथा परिष्वजन्ते आलिङ्गन्ति । श्रुतभयजनकमेघनिर्घोषाः कामिन्योऽपराधं विस्मृत्य रमणमालिङ्गन्ति इति भावः ॥ ११ ॥

विलोचनेन्दीवरवारिबिन्दुभि–
र्निषिक्तबिम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः
स्थिता निराशाः प्रमदाः प्रवासिनाम् ॥ १२ ॥

---

१ B K. 'मुक्ताक्षणम्'. २ B 'ध्वनताम्' 'घ्नताम्' ध्वनिते'. 'स्वनताम्' ३ B 'पयोमुचाम्'. ४ B K 'घनान्धकारावृत'. ५ 'पुनः पुनः शिवं' ६ B 'निःस्वाने' ७ B 'तडिद्भिः'. B. 'स्तनद्भिः'. ८ B 'कृत्वा'. ९ 'कृत'.

विलोचनेति । विलोचनानि नेत्राणीन्दीवराणीव कमलानीव तेभ्यो ये वारि-बिन्दवोऽश्रुबिन्दवस्तैः । निषिक्ता आर्द्रा बिम्बाधरा बिम्ब इवाधरा अधरोष्ठा निषिक्तबिम्बाधरास्ते चारुपल्लवा इव यासां ता रक्तकोमलाधरोष्ठा इत्यर्थः । निरस्तानि त्यक्तानि माल्यानि कुसुमान्याभरणान्यलङ्कारा अनुलेपनान्यङ्गरागाः चन्दनादयो याभिस्ताः प्रवासिनां पान्थानां प्रमदाः स्त्रियः । प्रोषितभर्तृकाणां साधारणोऽयं मार्ग इति भावः । निराशा आशाविरहिता स्थिता आसन् । तावद् मेघसमुन्नमनमालोक्य प्रियं चानागतं वीक्ष्य तदागमने निराशा अभवन्नित्यर्थः ॥१२॥

> विपाण्डुरं कीटरजस्तृणान्वितं
> भुजङ्गवद्वक्रगति प्रसर्पितम् ।
> ससाध्वसैर्भेककुलैर्निरीक्षितं
> प्रयाति निम्नाभिमुखं नवोदकम् ॥ १३ ॥

विपाण्डुरमिति । विशेषेण पाण्डुरं पीतवर्णमिश्रं सितम् । "पाण्डुस्तु पीतभागार्धः केतकीधूलिसन्निभः" इति शब्दार्णवः । मृत्तिकामिश्रितत्वेन वर्णवत्त्वमिति भावः । कीटाश्च रजांसि धूलयस्तानि तृणानि च तैरन्वितं युक्तं भुजंगवत्सर्पवद्वक्रगति यथा कुटिला गतिर्गमनं यस्य तत् प्रसर्पितमितस्ततो गमनशीलं साध्वसेन भीत्या सहितैः ससाध्वसैर्भेककुलैर्मण्डूककुलैर्निरीक्षितं दृष्टं सर्पबुद्ध्येति भावः । नवोदकं वर्षाकालोद्भवं नूतनं जलं निम्नाभिमुखं निम्नस्य नीचप्रदेशस्याभिमुखं प्रयाति गच्छति । स्वभावोक्तिरलंकारः ॥ १३ ॥

कलापचक्रेषु वर्दमभूरेषु नवस्य नूतनस्योत्पलस्य कमलस्याशया लिप्सया भ्रान्त्येत्यर्थः यान्ति निपतन्ति । कलापचक्रमेवानालोकितपूर्वं विजातीयं कमलमिति बुध्या तत्र गच्छन्तीत्यर्थः । मौढ्यं तु चिरपरिचितायाः प्रफुल्लपुष्पाया नलिन्यास्त्यागः कलापचक्रेषु नवोत्पलत्वबुद्धिरिति भावः । विपनपुष्पामिति पाठापेक्षयाऽयमेव प्रफुल्लपुष्पामिति पाठः साधीयान् । पद्मनाशे स्वाश्रयार्थं पर्यटतां भ्रमराणां पद्मसदृशं कलापचक्रमवलोक्य तत्र निपततां न महामौढ्यमपि तु पुष्पितां नलिनीं परित्यजतां चमत्कारिकमललिप्सया कलापचक्रे निपततामेव तन्मौढ्यं युज्यत इति दिक् । भ्रान्तिमानलंकारः ॥ १४ ॥

धनद्विपानां नववारिदस्वनै-
मंदान्वितानां ध्वनतां मुहुर्मुहुः ।
कपोलदेशा विमलोत्पलप्रभाः
सभृङ्गयूथैर्मदवारिभिश्चिताः ॥ १५ ॥

वनद्विपानामिति । नवा नूतना ये वारिदा मेघास्तेषां स्वनैर्गर्जनैर्मदान्वितानां मदेन युक्तानाम् । अन्यगजशब्दशंकया मत्तानाम् स्वभावोऽयं करिणां यत्तेऽन्यगजदर्शनेनोन्मत्ता भवन्ति । तथा चोक्तं रघुवंशेऽनेन कविना "वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्री" रिति । मुहुर्मुहुर्वारंवारं ध्वनतां गर्जतां वनद्विपानामारण्यकगजानां विमलानि स्वच्छान्युत्पलानि कमलानि तेषां प्रभेव प्रभा येषां ते कपोलदेशा गण्डप्रदेशाः सभृङ्गयूथैर्भृङ्गाणां यूथैः समूहैः सहितानि तैः । "यूथं तिर्यक्समूहेऽस्त्री" इति मेदिनी । मदवारिभिर्दानोदकैश्चिता व्याप्ता आसन् ॥ १५ ॥

सतोयनम्राम्बुदचुम्बितोपलाः
समाचिताः प्रस्रवणैः समन्ततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः
समुत्सुकत्वं जनयन्ति भूधराः ॥ १६ ॥

सेति । तोयभरैः सहिता नम्रा येऽम्बुदा मेघास्तैश्चुम्बिताः संस्पृष्टा उपलाः प्रस्तरा येषां ते । "उपलः प्रस्तरे रत्ने" इति मेदिनी । प्रस्रवणैर्निर्झरैः समन्ततः सर्वभागेषु समाचिताः सम्यग्व्याप्ताः । प्रवृत्तं प्रारब्धं नृत्यं नर्तनं यैस्तैः शिखिभिर्मयूरैः समाकुलाः व्याकुला भूधराः पर्वताः समुत्सुकत्वं मनस इति शेषः । जनयन्त्यु
यन्ति । निसर्गोदकरम्यत्वान्नृत्यन्मयूरान्भूधरानवलोक्य मनसि सर्वस्याप्यु
त्पन्न इति भावः । सितोत्पलाम्बुदचुम्बितोपला इति पाठे सितानां
नामभिवाभा येषां तैरम्बुदैश्चुम्बिता उपला येषामित्यर्थः । परं

नायागमनं शतोयनम्राम्बुदेति पदेन गम्यगयोऽयत इति, स एवात्र पाठोऽङ्गीकृत इत्यवसेयम् ॥ १६ ॥

कदम्बसर्जार्जुनकेतकीवनं
विकम्पयंस्तत्कुसुमाधिवासितः ।
सशीकराम्भोधरसंगशीतलः
समीरणः कं न करोति सोत्सुकम् ॥ १७ ॥

कदम्बेति । कदम्बो नीपः सर्ज. सालोऽर्जुनः ककुभः केतक्यश्च तासां वनं काननं विकम्पयंस्तेषां कुसुमैः पुष्पैरधिवासितः संस्कृतस्तत्पुष्पसुगन्धिरित्यर्थः । शीकरैरम्बुकणैः सहितो योऽम्भोधरो मेघस्तस्य संगेन संबंधेन शीतलः शीतः समीरणो मारुत. कं सोत्सुकं सोत्कण्ठं न करोति । सकलोपि जन ईदृशमाघ्राय मारुतं सोत्कण्ठो भवतीत्यर्थ. ॥ १७ ॥

शिरोरुहैः श्रोणितटावलंबिभिः
कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सहारैर्वदनैः ससीधुभिः
स्त्रियो रतिं संजनयन्ति कामिनाम् ॥ १८ ॥7-7

शिरोरुहैरिति । स्त्रियः प्रमदा. श्रोणितटे कटिपश्चाद्भागेऽवलम्बन्ते तैः शिरोरुहैः केशै । कृतोऽवतंसः शेखरो येषां तैः सुष्ठु गन्धो येषां तै· कुसुमैः पुष्पैः "गन्धस्येत्पूतिसुसुरभिभ्य" इत्यनेन समासान्त इकारः । "अवतंसो न स्त्रियां स्यात्कर्णपूरे च शेखर " इति मेदिनी । सहारैर्मुक्तामालासहितैः स्तनैः ससीधुभिः मधुनेक्षुरसजन्येन पक्वेन मद्येन सहितैः । " सीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् " इति· वचनात् । वदनैर्मुखैः कामिनां विलासिनां रतिं प्रीतिं संजनयन्ति सम्यगुत्पादयन्ति ॥ १८ ॥

अतैकः क्षेपक श्लोकः प्रमादादुपायायते ।

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्रयन्ति ।
नद्यो घना मत्तगजा वनान्ताः

ता दन्तिनो नदन्ति गर्जन्ति। वनान्ता वनप्रान्ता भान्ति शोभन्ते। प्रियाविहीना. कान्तावियुक्ता ध्यायन्ति एकाग्रमनसा किमपि कान्तागतं चिन्तयन्ति। शिखिनो मयूरा नृत्यन्ति मेघागमनेनेति भावः। प्लवंगा वानराः समाश्रयन्ति कुत्रापि स्वाश्रयं विचिन्वन्तीत्यर्थः। वर्षाकालपर्यन्तं नीडम्लो वानरा अट्टनगीऽत्वाद्रूपासु यत्र कुत्रापि स्वाश्रयं विलोकयन्तीत्यर्थः। यथासंख्यालंकारः। तल्लक्षणं तु "यथासंख्यं क्रमेणैव क्रमिकाणां समन्वय" इति॥

तडिल्लताशक्रधनुर्विभूषिताः
पयोधरास्तोयभरावलम्बिनः।
स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला
हरन्ति चेतो युगपत् प्रवासिनाम्॥ १९॥

तडिदिति। तडिल्लता लताकारा विद्युच्छक्रधनुरिन्द्रधनुश्च च ताभ्यां विभूषिता अलंकृताः तोयस्योदकस्य भरेणाधिक्येनावलम्बन्ते ते पयोधरा मेघाः। पयसां धरा इत्येव समासो भेदपदस्तु पुरुषार्थसमासे तु कुम्भकार इतिवल्लयोरार इति-स्याद्। काञ्च्यो रशना मणिकुण्डलानि रत्नखचितानि कर्णभूषणानि च तैरुज्ज्वला दीप्तिमत्यः स्त्रियः प्रवासिनां पान्थानां चित्तमन्तःकरणं युगपदेकदैव हरन्ति। प्रवासिनो नरा मार्गे तोयभरावनम्रान् विद्युल्लतो मेघान् रसनालंकृतमध्याः सकर्णभूषणा ललनाश्चावलोक्य चेतोविरहितत्वं यान्तीत्यर्थः। "स्त्रकर्ण्ययोरेव पमदानलाहकयोः पान्थचेतोहरत्वरूपसाधर्म्यात्तुल्ययोगितालंकार" ॥ १९॥

मालाः कदम्बनवकेसरकेतकीभि-
रायोजिताः शिरसि बिभ्रति योषितोऽद्य।
कर्णान्तरेषु ककुभद्रुममञ्जरीभि-
रिच्छानुकूलरचितानवतंसकांश्च॥ २०॥

माला इति। योषितः प्रमदा अद्य कदम्बानि नीपकुसुमानि नवानि केसराणि बकुलपुष्पाणि केतक्यश्च ताभिरायोजिता निर्मिता ग्रथिता इत्यर्थेन मालाः स्रजः शिरसि मूर्धनि केशपाशे इत्यर्थः। कर्णान्तरेषु कर्णपालिभागेषु। अन्तरशब्दस्य बहिर्वाचकत्वं सुप्रसिद्धमेव। ककुभद्रुमस्यार्जुनवृक्षस्य मञ्जरीभिः कलिकाभिरिच्छयाऽनुकूलं यथास्यात्तथा रचितान् ग्रथितानवतंसकान् कर्णभूषणानि बिभ्रति धारयन्ति॥ २०॥

पुष्पावतंससुरभीकृतकेशपाशाः ।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे
शय्यागृहं गुरुगृहात्प्रविशन्ति नार्यः ॥ २१ ॥

कालागुरुरिति । कालागुरुः कृष्णागुरुः प्रचुरो यस्मिंस्तेन चंदनेन चर्चितानि लिप्तान्यङ्गानि गात्राणि यासां ताः । "अंगगात्रकण्ठेभ्यो वक्तव्य"मिति वार्तिकेन वैकल्पिको ङीप् । "अंगं गात्रे" इति मेदिनी । पुष्पावतंसेन पुष्पशेखरेण सुरभीकृतः सुगन्धीकृतः केशपाशः केशसमूहो यासां ताः । अवतंसस्तु पुमान्कर्णपूरे शेखरयोरपीति मेदिनी । अवतंस इत्यस्य कर्णपूर इति व्याख्यानं नाति मनोरमं तेन कर्णस्थस्य केशपाशस्य सुगन्धीकरणासंभवात् । किंतु शेखर इत्येव व्याख्यानं (महाराष्ट्र भाषायाम् "गजरा") समुचितमिति दिक् । स्त्रियो नार्यो जलमुचां मेघानां ध्वनिं गर्जितमाकर्ण्य गुरुगृहाच्छ्वशुरादिगृहाच्छय्यागृहं शयनस्थानं प्रविशन्ति मदनजनकं चन्दनादिकं धारयन्त्योऽपि कामिन्यो मेघगर्जनाकर्णनेनापारयन्त्यो मन्मथविकारं सोढुं झटित्येव भर्तृसांनिध्याय शय्यागृहं गता इति कारणान्तरयोगतः कार्यमौक्यात्संभाविनामालङ्कारः ॥ २२ ॥

कुवलयदलनीलैरुन्नतैस्तोयनम्रै-
र्मृदुपवनविधूतैर्मन्दमन्दं चलद्भिः ।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः
पथिकजनवधूनां तद्वियोगाकुलानाम् ॥ २२ ॥

कुवलयेति । कुवलयानां नीलोत्पलानां दलानां पर्णानीव नीलैरसितवर्णैरुन्नतैरुच्छ्रितैस्तोयेनोदकेन तद्भारेणेत्यर्थः नम्रैरत एव मृदुना पवनेन वातेन विधूतैः कम्पितैरत एव च मन्दमन्दं शनैः शनैश्चलद्भिर्गच्छद्भिः सेन्द्रचापैरिन्द्रचापेनेन्द्रधनुषा सहितैस्तोयदैर्मेघैस्तेषां पथिकानां वियोगेनाकुलानां पीडितानां पथिकजनवधूनां पान्थयुवतीनां चेतोऽन्तःकरणमपहृतमिव हृतं नीतमिव । मालिनीवृत्तं लक्षणं तूक्तमेव । अत्र मृदुपवनविधूतैरित्यनेन मेघदूतस्थं "मन्दंमन्दं नुदति पवनश्चानुकूल" इति पद्यं स्मारितम् ॥ २२ ॥

मुदित इव कदम्बैर्जातपुष्पैः समन्ता-
त्पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकच्छिन्नतापो वनान्तः ॥२३ ॥

मुदित इति । नवस्य नूतनस्य सलिलस्योदकस्य निषेकात्सिञ्चनाच्छिन्न

---

१ 'दलसारै', २ 'रुद्धतैः' ३ 'स्तोयनम्रैः' ४ 'विशेषा'. ५ 'सायनम्रैः'. ६ B K. 'तद्वियोगक्षतानाम्'. ७ 'जाति'. ८ 'सूचिभिः' ९ B. K 'निष्क्रान्तशान्ततापः'.

शान्तस्तापः पीडा यस्य स वनान्तोऽरण्यप्रान्तः समन्तात् जातानि पुष्पाणि कुसुमानि येषां तैः कदम्बैर्मुदित इव संतुष्ट इव । पवनेन वातेन चलिताः कम्पिताः शाखा येषां तैः शाखिभिर्वृक्षैर्नृत्यतीव नर्तनं विदधातीव । केतकीनां सूचिभिः परागैर्हसितमिव हास्यमिव विधत्ते करोति । हास्यस्य शुभ्रवर्णत्वात्केतकीपरागै- स्तदुत्प्रेक्षा युज्यत एव । उत्प्रेक्षालंकारः २३ ॥


शिरसि वकुलमालां मालतीभिः समेतां
विकसितनवपुष्पैर्यूथिकाकुड्मलैश्च ।
विकचनवकदम्बैः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत्काल एषः ॥ २४ ॥

शिरसीति । जलदानां मेघानामोघः समूहो यस्मिन्स जलदौघ एष कालो वर्षर्तुः कान्तवद्भर्तेव वधूनां भार्याणां शिरसि मूर्धनि केशपाश इति यावत् । मालतीभिर्मालतीपुष्पैः समेतां युक्तां वकुलमालां केसरदाम रचयति निबध्नाति । यथा प्रेम्णा भर्ता भार्याकेशपाशे मालानिबन्धनं संपादयति तद्वदयमपि पुष्पादिना तत्संपादयतीति भावः । विकसितैः प्रफुल्लैर्नवपुष्पैर्नूतनकुसुमैर्यूथिकाया मागध्याः "जाई" इति महाराष्ट्रभाषाया । कुड्मलैः कलिकाभिश्च विकचानि संफुल्लानि नवानि कदम्बानि नीपपुष्पाणि तैश्च वधूनां स्त्रीणां कर्णपूरं कर्णभूषणं रचयति करोतीत्यर्थः । उत्प्रेक्षालंकारः ॥ २४ ॥

दधति वरकुचाग्रैरुन्नतैर्हारयष्टिं
प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजलकणसेकादुद्गतां रोमराजीं
ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः ॥ २५ ॥

दधतीति । नार्यः प्रमदा उन्नतैरूर्ध्वमुखैः वरैः श्रेष्ठैः कुचाग्रैः स्तनाग्रैर्हारयष्टिं मुक्ताहारभागं । यष्टिशब्दो हारभागवाचकः । महाराष्ट्रभाषाया "पदर" इति । आयतैर्विस्तृतैः श्रोणिबिम्बैः कटिपश्चाद्भागैः प्रतनूनि सूक्ष्माणि सितानि शुभ्राणि दुकूलानि वस्त्राणि । ललिताना सुन्दराणां वलीनां त्रिवलीनां भङ्गा रचना येषु तैर्मध्यदेशैरुदराणां जलकणानामुदकबिन्दूनां सेकात्सिञ्चनादुद्गतामुत्पन्नां रोम-

तृतीयः सर्गः



शरद्वर्णनम्।

क्रमागतं शरत्कालं वर्णयति।

काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसरवनूपुरनादरम्या।
आपक्वशालिरुचिरानतगात्रयष्टि
प्राप्ता शरन्नववधूरिव रूपरम्या॥१॥

काशांशुकेति। काशमेव तृणविशेष एव "कव्हाळे" इति महाराष्ट्रभाषायामंशुकं वस्त्रं यस्याः सा। पक्षे काशमिवांशुकं यस्याः। श्वेतवसनधारिणीत्यर्थः। विकचं प्रफुल्लं पद्ममेव मनोज्ञं सुन्दरं वक्त्रमाननं यस्याः सा। पक्षे विकचपद्ममिव मनोज्ञं वक्त्रं यस्याः। सोन्मादानामुन्मादेन मदेन सहितानां हंसानां रव एव नूपुरस्य मञ्जीरस्य नादः शिञ्जितं तेन रम्या मनोज्ञा पक्षे सोन्मादहंसरव इव यो नूपुरनादस्तेन रम्या। आपक्वा आ समन्तात्परिणताः शालयः कलमा एव रुचिरा सुन्दरा आनतेषन्नम्रा गात्रयष्टिः शरीरयष्टिर्यस्याः। "शालिस्तु कलमादौ च" इति मेदिनी। पक्षे आपक्वशालिरिव रुचिरानतगात्रयष्टिर्यस्याः। आपक्वशालिरुचिरातनुगात्रयष्टिरिति पाठे ईषत्कृशेत्यर्थः। अतः स पाठो न सङ्गच्छते। रूपेण सौन्दर्येण रम्या शरद् नववधूरिव नूतनवधूरिवागता। उपमालङ्कारः। यथा नववधूर्लज्जितलज्जिता नम्रमुखी आगच्छति तद्वदियमपि पक्वशालिमिषेण नतमुखीत्यर्थो गम्यतेऽस्मिन् आपक्वशालिरुचिरानतगात्रयष्टिरिति पाठ इत्यलम्॥ वसन्ततिलकावृत्तम्॥१॥

काशैर्मही शिशिरदीधितिना रजन्यो
हंसैर्जलानि सरितां कुमुदैः सरांसि।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः॥२॥

काशैरिति। काशैः काशपुष्पैर्मही पृथिवी। शिशिराः शीतला दीधितयोऽशवो यस्य तेन चन्द्रेण रजन्यो रात्रयः हंसै राजहंसैः सरितां नदीनां जलानि। कुमुदैः श्वेतकमलैः सरांसि। कुसुमानां पुष्पाणां भारेण नतैर्नम्रैः सप्तच्छदैः सप्तपर्णैर्वनान्ता वनप्रान्तभागाः मालतीभिर्मालतीपुष्पैश्चोपवनानि शुक्लीकृतानि शुभ्रीकृतानि॥२॥

---

१ B. 'रुन' २ B. K 'ललिता.' ३ D J. N. 'तनु".
B 'रम्यरूपा'. 'हारिरूपा'

चञ्चन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः ।
नद्यो विशालपुलिनोरुनितम्बबिम्बा
मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥ ३ ॥

चञ्चदिति । चञ्चन्ती मनोज्ञा मञ्जुला शफरी शुभ्रो मत्स्यविशेष एव रसनाकलापः काञ्चीगुणो यासां ताः । पक्षे चञ्चन्मनोज्ञशफरीव रसनाकलापो यासाम् । पर्यन्ते प्रान्तदेशे संस्थिता ये सिताः शुभ्रवर्णा अण्डजा हंसादयः पक्षिणस्त एव हारो मुक्ताहारो यासां ताः । पक्षे पर्यन्तसंस्थितसिताण्डजा इव हारो यासां ताः । विशालः पृथुलो यः पुलिनो वालुकाप्रान्तः स एव उरु महद् नितम्बबिम्बं कटिपश्चाद्भागो यासां ताः । पक्षे विशालपुलिन इवोरु नितम्बबिम्बं यासां ताः । नद्योऽद्य शरत्काले मदेनयौवनजेनेतियावन्सहिताः समदाः प्रमदा इव मन्दं शनैः शनैः प्रयान्ति गच्छन्ति । उपमालंकारः ॥ ३ ॥

व्योम क्वचिद्रजतशङ्खमृणालगौरै-
स्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः ।
संलक्ष्यते पवनवेगचलैः पयोदै-
राजेव चामरशतैरुपवीज्यमानः ॥ ४ ॥

व्योमेति । व्योमाकाशं क्वचित् कुत्रचिद्रजतं रौप्यं शङ्खः कम्बुर्मृणालं बिसं च तानीव गौराः शुभ्रवर्णास्तैः । त्यक्तमम्बुदकं यैस्तैस्त एव लघुतयोदकभागाभावाच्छतशः शतं शतं प्रयातैः पवनवेगेन चलैश्चञ्चलैः पयोदैश्चामरशतैरनेकैश्चामरैरुपवीज्यमानो राजेव नृप इव संलक्ष्यते दृश्यते शोभते । उपमालंकारः ॥ ४ ॥

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं
बन्धूकपुष्परचिताऽरुणिता च भूमिः ।
वप्राश्च पक्वकलमावृतभूमिभागाः
प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः ॥ ५ ॥

भिन्नेति । भिन्नश्छिन्नो योऽञ्जनप्रचयः कज्जलसमूहस्तद्वत्कान्तिः प्रभा यस्य तत् । मनोज्ञं सुन्दरं नभ आकाशम् बन्धूकपुष्पैर्बन्धुजीवपुष्पैः " दुपारी " इति भाषायाम् प्रसिद्धैः रचिता संपादिता अरुणिता रक्तिमा यस्याः सा भूमिश्च । पक्वैः कलमैः शालिभिरावृता वेष्टिता भूमिभागा

१ 'यस्या'. २ 'भजित'. ३ D. J. N. 'पुलिनान्त'. ४ 'देशा'. ५ 'वीना'. 'शुक्ला'. ६ B. 'उपेक्ष्यते'. 'उपेक्षते'. ७ D. J. N. 'चामरवैः' ८ B 'रुपवीज्यमानः'. 'रवि वीज्यमानः' ९ B. 'रक्तारचिता'. 'चित्ररचिता'. १० 'चारुकला' J. N. B. 'चारुकमला'. 'पक्वकलमावृत'. ११ B. '—यन्ति'

यथा ते वप्राश्च चारुरमणीयभूमिभागा इति पाठे तु चारुभिमनोहरैः कमलैरा॰ च्छन्ना भूमिभागा येषां ते वप्रास्तटा इत्यर्थः । "वप्र प्राकाररोधसोः । क्षेत्रे ताते चये रेणौ" इति हेमचन्द्रः । भुवि कस्य यूनो मनो मानसं न प्रोत्कण्ठयन्ति सो त्कण्ठं न विदधति । अपि तु सर्वस्यापीत्यर्थः ॥ ५ ॥

मन्दानिलाकुलितचारुविशालशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेक-
श्चित्तं विदारयति कस्य न कोविदारः ॥ ६ ॥

मन्देति । मन्देनाल्पेनानिलेन पवनेनाकुलिताः पीडिताः कम्पिता इति यावत् । चारवः सुन्दरा विशाला महत्यः शाखा स्कन्धा यस्य सः पुष्पाणां कुसुमानां मुद्गमस्योत्पत्तेः प्रचयेनाधिक्येन कोमलानि सुकुमाराणि पल्लवानां पर्णानाम् अग्राणि यस्य सः । मत्तैर्मदयुक्तैर्द्विरेफैर्भ्रमरैः परिपीतो मधुनो मकरन्दस्य प्रसेकः प्रसरो यस्य सः कोविदारश्चमत्कारवृक्षः "कांचन" इति महाराष्ट्रीयभाषायाम् । कस्य चित्तं न विदारयति । कस्य मानसं विदीर्णं न करोत्यपि तु सर्वस्यापीत्यर्थः ॥ ६ ॥

तारागणप्रवरभूषणमुद्वहन्ती
मेघावरोधपरिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्नादुकूलममलं रजनी दधाना
वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥ ७ ॥

तारेति । ताराणां नक्षत्राणां गणः समूह एव प्रवरं श्रेष्ठं भूषणमलङ्कारो यस्याः पक्षे तारागण इव प्रवरभूषणं यस्याः । मेघानामवरोधेन व्यवधानेन परिमुक्तो रहितः शशाङ्कश्चन्द्रमा स एव वक्त्रं यस्याः सा । पक्षे मेघावरोधपरिमुक्तशशाङ्क इव वक्त्रं यस्याः । अमलं स्वच्छं ज्योत्स्नैव चन्द्रिकैव दुकूलं दधाना बाला तन्व्यङ्गीभूता रजनी बाला प्रमदा युवतिरिव वृद्धिं प्रयाति । अस्मिन्काले तन्व्यङ्गीभूता रात्रिः क्रमेण वर्धते तदनुरोधेनेयमुत्प्रेक्षितेति भावः ॥ ७ ॥

कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोऽरुणितास्तटिन्यः ॥ ८ ॥

१ J. N. D 'रम्यभागाः', 'चारुमनोज्ञ', 'सर्वमनोज्ञ' — 'प्रचुर', 'प्रवर्णभिलाप्याङ्ग', ३ D B. J. 'प्रचुर.' ४ B. 'मेघोपरोध', 'वसना', ६ 'कारण्डवौघ', 'कारण्डवास्य', ७ G N. 'सरोरुह', J. 'घन पद्मरेणुभिराग', K. 'सरोरुहरेणुरेणुतरंग', मते [illegible].

कारण्डवान । कारण्डवानां जलकुक्कुटानां पक्षिविशेषाणामानन्दसुखनिध-
र्निना महता कलकलस्वरेण हृद्यं रम्या ता । कादम्बानां कलहंसानां पक्षि-
विशेषाणां कुलेन समूहेनाकुला व्याप्ता उद्धासप्रदेशास्तटप्रदेशा यासां ता । सरो-
रुहाणां कमलानां रजोभिः परागैर्मिश्रिताः कपिलीकृतास्तदिन्यो नद्यः पतिं स-
मन्ताद्भावितैर्हेतुभिरनल्पं प्रीतिं कुर्वन्ति जनयन्तीत्यर्थः । प्रीतिं परां-
कलहेसकुला इति पाठे रमणीयाः पक्षिभिः व्याप्ता इत्यर्थः ८ ॥

नेत्रोत्सवो हृदयहारिमरीचिमालः
प्रह्लादकः शिशिरसीकरवारिवर्षी ।
पत्युर्वियोगविषदग्धशरक्षतानां
चन्द्रो दहत्यतितरां तनुमङ्गनानाम् ॥ ९ ॥

नेत्रोत्सव इति । नेत्राणां नयनानामुत्सव आनन्दकर इति यावत् । हृदयं
हरतीति सा हृदयहारिणी तादृशी मरीचिमाला किरणपङ्क्तिर्यस्य सः । तादृशी मरीचीनां
किरणानां माला पङ्क्तिर्यस्य सः । प्रह्लादकः सन्तानन्दजनकः शिशिरं शीतं सी-
करणां कणानां वारि उदकं वर्षति स शिशिरसीकरवारिवर्षी । यद्यपि सीकरपदं "सी-
करोऽम्बुकणाः स्मृताः" इत्यमरकोशादम्बुकणस्पर्शाशब्दाभिधायि तथापि तस्य वारिरूपे
विशेषणपदसमभिव्याहारे रूपमात्रपरत्वम् । विशिष्टवाचकानां पदानां विशेषणपद-
समभिव्याहारे विशेष्यमात्रपरत्वमिति न्यायात् "स्पर्शाचैर्मांसपूर्णैरन्त्रै"रितिवत् ।
चन्द्र इन्दुः पत्युर्भर्तुर्वियोग एव विषं तेन दिग्धो लिप्तो यः शरस्तेन क्षता व्रणि-
तास्तासामङ्गनानां वियोगिनीनां तनुं शरीरमतितरामत्यन्तं दहति सन्तापयति ॥९॥

आकम्पयन्फलभरानतशालिजाला-
न्यानर्तयंस्तरुवरान्कुसुमावनम्रान् ।
उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन्
यूनां मनश्चलयति प्रसभं नभस्वान् ॥ १० ॥

आकम्पयन्निति । फलानां भरेणाधिक्येनानतानि शालिजालानि कलम-
समूहान्यानाकम्पयन्नापि चालयन् कुसुमैः पुष्पैरवनम्रान्तरुवरानानर्तयन् । एतेन
पवने मान्द्यमावेदितमन्यथा स एव वेगवान् पवनः फलानि कुसुमानि च भूमौ
पातयेत् । उत्फुल्लानां पङ्कजानां वनं निवासो यस्याः तां नलिनीं कमलिनीं
विधुन्वन् विशेषेण कम्पयन् नभस्वान् यूनां तरुणानां मनो मानसं चलयति
कम्पयति विकारयतीत्यर्थः । "वनं नपुंसकं नीरं निवासालयकानन" इति मेदिनी ।
प्रोत्फुल्लपङ्कजवनामिति पाठे तु प्रोत्फुल्लानि पङ्कजानि विकसितानि यस्यास्तामित्यर्थः ।

सोन्मादहंसमिथुनैरुपशोभितानि
स्वच्छानि फुल्लकमलोत्पलभूषितानि ।
मन्दप्रभातपवनोद्गतवीचिमाला-
न्युत्कण्ठयन्ति सहसा हृदयं सरांसि ॥ ११ ॥

सोन्मादेति । सोन्मादानामुन्मादेन चित्तविभ्रमेण सहितानां मत्तानामिति यावत् "उन्मादश्चित्तविभ्रम" इत्यमरः । हंसानां मिथुनैर्द्वन्द्वैरुपशोभितान्यलंकृतानि। स्वच्छान्यमलानि फुल्लानि विकसितानि कमलानि पद्मान्युत्पलानीन्दीवराणि च तै-र्भूषितानि । मन्देन प्रभातपवनेन प्रातर्वायुनोद्गतोत्पन्ना वीचीनां लहरीणां माला पङ्क्तिर्येषु तानि सरांसि सरोवराणि हृदयं मानसं सहसा अतर्कितमुत्कण्ठयन्ति । सोत्कण्ठं विदधति । " अतर्किते तु सहसे "त्यमरः । प्रसभमिति पाठे तु बला-त्कारेणेत्यर्थः. ११ ॥

नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः
पश्यन्ति नोन्नतमुखा गगनं मयूरा ॥ १२ ॥

नष्टमिति । अद्य जलदानां मेघानामुदरेषु गर्भेषु बलभिद इन्द्रस्य धनुर्नष्टं विलुप्तम्। वियत आकाशस्य पताका ध्वजभूता सौदामिनी विद्युन्न स्फुरति न विल-सति । बलाका पक्षिविशेषा. पक्षपवनै. पक्षवातैर्नभो न धुन्वन्ति न कम्पयन्ति । उन्नतमूर्ध्वं मुखं येषा ते मेघावलोकनायेति भावः मयूरा बर्हिणा गगनं न प-श्यन्ति । वर्षाकाले हि मेघसंनिधानाद्बलाका वियदलंकुर्वन्ति । उक्तं हि कविव-रेण मेघसंदेशे " सेविष्यन्ते नयनसुभगं खे भवन्तं बलाका " इति । अधुना । मेघाभावात्र सन्त्येव ते पक्षिण इत्यभिप्रायेणेदम् ॥ १२ ॥

नृत्यप्रयोगरहितान् शिखिनो विहाय
हंसानुपैति मदनो मधुरप्रगीतान् ।
मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान्
सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥ १३ ॥

नृत्येति । मदनो मन्मथो नृत्यप्रयोगेण नर्तनप्रयोगेण रहितान् वर्जितान्

---

१ U. G. N. 'स्वच्छ'. २, 'चारु'. ३ B. K. 'मन्दप्रचार'. 'मन्दप्रभात'. 'मन्दप्रवाह'. ४ 'पवनोद्धत'. ५ 'उत्कम्पयन्ति'. 'हृदयं महसा'. 'प्रसभं हृदयम्'. ७ 'जलदोदरेषु'. ८ 'चोन्नतमुखाः'. 'नोद्गतमुखाः' 'नोद्धतमुखाः'. १० 'प्रगीतान्'. [illegible]'. १२ 'नीपवृक्षान्'. १३' [illegible]'

शिखिनो मयूरान् विहाय त्यक्त्वा मधुरं सुन्दरं प्रगीतं गानं येषां तान् हंसानुपैति गच्छति । मधुरप्रतीतान् इति पाठे मधुरा इति प्रतीताः प्रसिद्धास्तान् । "प्रतीत सादरे ज्ञाते हृष्टप्रख्यातयोस्त्रिषु" इति मेदिनी । कुसुमानां पुष्पाणामुद्गमस्योत्पत्तेः श्रीः शोभा कदम्बो वृक्षविशेषः कुटज शक्र अर्जुन इन्द्रद्रुवृक्ष नीप कदम्ब प्रकारस्तान् विहाय सप्तच्छदान् सप्तपर्णवृक्षान् "सातवण" इतिभाषायामुपगता प्राप्ता । वर्षाकाले इमे सर्वेऽपि वृक्षाः पुष्पपूर्णा भवन्तीति पूर्वसर्ग एव स्पष्टम् ॥१३॥

शेफालिकाकुसुमगन्धमनोहराणि
स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि
प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम् ॥१४॥

शेफालिकेति । शेफालिकाया निर्गुण्ड्याः कुसुमानां पुष्पाणां गन्धेन सुवासेन मनोहराणि सुन्दराणि । स्वस्थं पीडारहितं यथास्यात्तथा स्थितानामुपविष्टानाम् अण्डजानां पक्षिणां कुले समूहे । प्रतिनादितानि प्रतिशब्दितानि । पर्जन्यादिपीडानाशात् स्वस्थस्थितानां पक्षिणां मधुरैः शब्दैर्नादितानीत्यर्थः । यद्वा तापदावानलादिना शान्त्यस्थस्थिता इत्यर्थः मनो मनोरमम् । तन्नाशात् पूर्वतुलनाविहीनत्वेन तदानन्दस्य पूर्वाननुभूतत्वात् । पर्यन्ते आसमन्तात् संस्थितानामुपविष्टानां मृगीणां नयनान्येवोत्पलानीन्दीवराणि यत्र तान्युपवनानि पुंसां पुरुषाणां मनांसि प्रोत्कण्ठयन्ति उत्कण्ठायुक्तानि कुर्वन्ति ॥ १४ ॥

कल्हारपद्मकुमुदानि मुहुर्विधुन्वं-
स्तत्संगमादधिकशीतलतामुपेतः ।
उत्कण्ठयत्यतितरां पवनः प्रभाते
पत्रान्तलग्नतुहिनानि हरंस्तरूणाम् ॥ १५ ॥/2

कल्हारेति । प्रभाते प्रातःकाले कल्हारं रक्तकमलं पद्मं नलिनं कुमुदं सितकमलं च तानि मुहुर्वारंवारं विधुन्वन्कम्पयन् । तत्संगमात्तेषां कल्हारादीनां संगमात्संबन्धादधिकशीतलतामत्यन्तशैत्यमुपेतः प्राप्तः पत्राणां पर्णानां प्रान्ते प्रान्तभागे लग्नानि संसक्तानि तुहिनानि तुषारान् हरन् पवनोऽतितरामत्यन्तमुत्कण्ठयत्युत्सुकयति । पत्रान्तलग्नतुहिनाम्बु विधूयमान इति पाठस्तु न सम्यक् । विधूयमान इति हि कर्मणि शानन्तं तस्य कर्मण एव विशेषणत्वस्य न्याय्यत्वेन कर्तरि

---

१ D G. J 'राग' २ B 'शाखास्थित' 'वृक्षस्थित' 'गुल्मस्थित', 'स्वच्छस्थित' 'गण' ४ प्रतिवादितानि' ५ 'मृगाम्' K. 'कुसुमानि ७ 'मुदा' ८ K 'उपेत्य'. ९ B 'सोत्कं करोति वनिताम्' 'सोत्कं करोति वनिता' 'सोत्कं करोति हृदयम्' १० D J. N. B. 'तुहिनांशुविधूयमान' —'विधुन्वन् वनद्रुमाणाम्'.

रवकीर्णं व्याप्तं व्योमाकाशं स्फुटैः प्रफुल्लैः कुमुदैः कुवलयैश्चिता अवकीर्णास्तेषाम् । स्थिता राजहंसा तेषाम् । "जातिकालसुखादिभ्यः परा निष्ठा वक्तव्ये"ति वार्तिकेन निष्ठान्तस्य स्थितशब्दस्य परनिपातः । मरकतमणेर्गारुत्मतरत्नस्य भा इव भा. प्रभा यस्य तेन वारिणोदकेन भूषितानामलंकृताना तोयाशयाना जलाधाराणाम् । अतिशयमत्यन्तं रूपं स्वरूपं यस्यास्ता श्रियं कान्तिं वहति धारयति शरदि गगनसलिलनैर्मल्यप्रसिद्धेरिति भावः । मालिनीवृत्तम् ॥ २१ ॥

शरदि कुसुमसङ्गाद्वायवो वान्ति शीता
विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।
विगतकलुषमम्भः श्यालिपङ्का धरित्री
विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥ २२॥

शरदीति । शरदि शरदृतौ वायव कुसुमाना पुष्पाणा संगात्संवन्धाच्छीतलाः शाता यान्ति वहन्ति । विगतानि नष्टानि जलदाना मेघाना वृन्दानि चया येभ्यस्ते दिग्विभागाः ककुप्प्रान्ता मनोज्ञा सुन्दरा विशदजलदवृन्दा इति पाठोऽपि साधु । यतोऽस्मिन्नृतौ तोयविरहिताना विशदाना मेघानामुपलम्भात् । अम्भ उदकं विगतं विशेषेण नष्टं कलुष्यं यस्य तत् कलुषशब्दो भावप्रधानोऽङ्गीकार्यः सर्वथा मलरहितत्वात्संग्राह्यमित्यर्थ । अत एव " नादेयं नादेयं शरदि वसन्ते च नादेयम् " इति सुभाषितोक्तिरपि युज्यते । धरित्री पृथ्वी शालिपक्का पक्का शालयो यस्या सा तथाभूता । जातिकालसुखादिभ्य. परा निष्ठेति वार्तिकेन पक्वशब्दस्य परनिपात. । श्यानपङ्केति पाठे श्यानः शुष्क पंक कर्दमो यस्यास्तथाभूतेत्यर्थः । विमला. स्वच्छाः किरणा अंशवो यस्य तादृशश्चन्द्रो यस्मिंस्तथाभूतं व्योमाकाशं ताराभिस्तारकैर्विचित्रं चमत्कृतिजनकमित्यर्थ ॥ २२ ॥

अत्र द्वौ श्लोकौ क्षेपकौ तौ व्याख्यायेते ।

करकमलमनोज्ञाः कान्तसंसक्तहस्ता
वदनविजितचन्द्रा काश्चिदन्यास्तरुण्य ।

---

१ 'सुरभि'. २ B. N. K. 'कुमुद'. ३ 'तोयात्'. ४ D. J. 'यान्ति'. ६ 'विशद' व्यपगतजलवृन्दा दिश्यम्पाथ मेघाः ६ D. N. श्यानपङ्का J. 'श्यामपङ्का' 'शुष्कपङ्का'.

*This and the following verse appear to be interpolations and they have been printed as such by G. and N.. B. incorporates them in the body of the book and numbers them as if they by the author. D. J. and J. 2 do not print at all.

चितकुसुमसुगन्धि प्रायशो यान्ति वेश्म
प्रबलमदनहेतोस्त्यक्तसंगीतरागाः ॥ १ ॥

करेति । करकमलेन हस्ताम्बुजेन मनोज्ञाः सुन्दराः कान्तो प्रियकरे संसक्तो हस्तो यासां ताः कान्तेन हस्ते धृता कान्तस्कंधे स्थापितहस्ता वेत्यर्थः । वदनेन विजितस्तिरस्कृतश्चन्द्रो याभिस्ताः । काश्चिदन्यास्तरुण्यः प्रबलमदनहेतोः “ षष्ठी हेतुप्रयोगे ” इत्यनेन षष्ठी । त्यक्तः संगीते गाने रागः प्रेमा याभिस्तथाभूताः सत्यः चितैरेकीकृतैः कुसुमैः पुष्पैः सुगन्धि सुरभि वेश्मार्थाच्छय्यागृहं प्रायशो यान्ति प्रतिष्ठन्त इति भावः । अत्रान्येषां पाठाना क्लिष्टत्वादनादरः ॥ १ ॥

सुरतरसविलासाः सत्सखीभिः समेता
असमरसविनोदं सूचयन्ति प्रकामम् ।
अनुपममुखरागा रात्रिमध्याविनोदं
शरदि तरुणकान्ताः सूचयन्ति प्रमोदात् ॥ २ ॥

सुरतेति । सतीभिः सखीभिः समेताः सुरतरसस्य विलासाः प्रकाममत्यन्तमसमस्य सर्वोत्कृष्टस्य रसस्य विनोदं सूचयन्ति । तथा शरदि तरुणकान्ताः तरुणानां कान्ता भार्याः अथवा तरुणः कान्तो यासां ताः । अनुपमो निरुपमो मुखराग आननकान्तिर्यासां ताः प्रमदाः रात्रिमध्ये कृत आ सम्यग्विनोदं प्रमोदात् सूचयन्ति । अस्य क्लिष्टत्वादेन कालिदासकृतोऽयमिति न निश्चय । नहीदृशं क्लिष्टं काव्यं तादृशस्य कवेरस्ति ॥ २ ॥

दिवसकरमयूखैर्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य ।
कुमुदमपि गतेऽस्तं लीयते चन्द्रबिम्बे
हसितमिव वधूनां प्रोषितेषु प्रियेषु ॥ २३ ॥

दिवसकरेति । प्रभातेऽह्नमुखे । दिवसकरस्य आलोकमयूखै रश्मिभिर्बोध्यमानं विकास्यमानं पंकजं कमलमद्य वरयुवतिः श्रेष्ठा कामिनी, तस्या मुखस्य आभेव कान्तिरिवाभा यस्य तादृशं जृम्भते शोभते । कुमुदं कैरवं चन्द्रबिम्बेऽस्तंगते सत्यस्ताचलमाक्रान्ते सति, प्रियेषु रमणेषु प्रोषितेषु दूरदेशगतेषु वधूनां कामिनीनां हसितमिव हास्यमिव लीयते क्षीणं भवति । चन्द्रविकासिकमलमस्तंगते चन्द्रे प्रोषितवधूहास्यमिव निमीलतीत्यर्थः । म्लायत इति पाठः सुगमः ॥२३ ॥

१ N. रचितकुसुमगन्धि. २ G. B. प्राविशन्तीव वेश्म. ३ N. हेतो सूक्तसङ्गीतरम्या. ४ B G. निरासात्. ५ N. असमरसर. ६ B. G. सूचयन्त्यप्रकामम्. ७ N. अनुगतमुखरागैः. ८ N. श्रोणिमध्ये. ९ N. प्रमोदात्. १० ‘ शोभते. ’ ११ ‘ कुमुदमुपगतश्रीग्लोपिते. ’ १२ ‘ म्लायते. ’ १३ D. ‘ चन्द्रबिम्बम्. ’

अमितनयनलक्ष्मीं लक्षयित्वोत्पलेषु
क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।
अधररुचिरशोभां बन्धुजीवे प्रियाणां
पथिकजन इदानीं रोदिति भ्रान्तचित्तः ॥ २४ ॥

असितेति । पथिकजनः पान्थवर्ग इदानीं प्रियाणां स्वप्रेयसीनाम् । असितानां कृष्णानां नयनानां लक्ष्मीं शोभाम् उत्पलेषु नीलकमलेषु । क्वणिता सशब्दा या कनककाञ्ची सुवर्णमेखला तां मत्तहंसस्वनेषून्मत्तहंसध्वनिषु । अधरोष्ठस्य रुचिरां मनोहरां शोभां बन्धुजीवे बन्धूकपुष्पे च लक्षयित्वा तर्कयित्वा स्मृत्वेत्यर्थः । भ्रान्तचित्तः सन् भ्रान्तं भ्रमणयुक्तं चित्तं यस्य तादृशः सन् रोदिति । अश्रुनिपातं करोति ॥ २४ ॥

स्त्रीणां निधाय वदनेषु शशाङ्कलक्ष्मीं
कामं च हंसवचनं मणिनूपुरेषु ।
बन्धूककान्तिमधरेषु मनोहरेषु
क्वापि प्रयाति सुभगा शरदागमश्रीः ॥ २५ ॥

स्त्रीणामिति । सुभगा मनोहरा शरदागमश्रीः शरदृतुशोभा स्त्रीणां युवतीनां वदनेषु मुखेषु शशाङ्कलक्ष्मीं चन्द्रस्य शोभाम् । कामं मनोहरं हंसवचनं हंसकूजितं मणिनूपुरेषु रत्नखचितमञ्जीरेषु । हास्ये विशुद्धवदने कुमुदाकरश्रीरिति श्रीमिति च पाठद्वयमप्यशुद्धं प्रमादागतमिति भाति । सर्वथा श्रीमितिरूपाभावात्प्रथमान्तपदस्य प्रकृतानुपयोगाच्च । बन्धूकस्य कान्तिं लावण्यं मनोहरेष्वधरेषु निधाय संस्थाप्य । क्वापि कुत्राप्यज्ञातप्रदेशं प्रयाति गच्छति । एतेन शरदृतुगमनकालः समागत इति सूचितम् ॥ २५ ॥

आशीर्वचनपूर्वकमुपसंहरति ।

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशश्वेतवासो वसाना ।

---

१ कान्तिम्. २ J. कान्तिम्. ३ हंसी. ४ K. प्रियायाः ५ J. D. वानिनेताः. ६ J. G N. D. 'विहाय.' 'विधाय.' ७ 'स्पर्शी.' ८ कामं तु. B. हास्ये विशुद्धवदने कुमुदाकरश्रीम्. हास्ये विशुद्धवदने कुमुदाकरश्रीः. ९ पुरम १० K. कुसुमितनवकाशा व्याकुलाऽम्बिका सा. B. कुसुमितनवकाशा श्वेतवासो वसाना. विकसितनवकाशा संकुला. ... कुसुमितनवकाशा व्याकुलाऽम्बिकाभा. कुसुमितनवकाशा व्याकुलाऽ...

कुमुदरुचिरहासा कामिनीवोन्मदेयं
प्रतिदिशतु शरद्वश्चेतसि प्रीतिमग्र्याम् ॥ २८ ॥

इति श्रीकालिदासकृतावृतुसंहारे शरद्वर्णनं नाम
तृतीयः सर्गः ॥ ३ ॥

विकचेति । विकचं प्रफुल्लं कमलमेव वक्त्रमाननं यस्याः सा पक्षे विकचकमलमिव वक्त्रं यस्याः । फुल्लानि विकसितानि नीलोत्पलान्येवाक्षिणी यस्याः सा। पक्षे फुल्लनीलोत्पलमिवाक्षिणी यस्याः। विकसितं यन्नवकाशं नवकाशकुसुममेव श्वेतवासः शुभ्रवसनं वसाना दधाना ।पक्षे विकसितनवकाशमिव श्वेतवासो वसाना। विकसितनवकाशासंकुलाल्विवसेति पाठे विकसितनवकाशमेव असंकुलमालग्नि वस्त्रं यस्याः इतीत्यर्थो ज्ञेय । कुमुदान्येव रुचिरो मनोहरो हासो हास्यं यस्याः सा । पक्षे कुमुदमिव रुचिरो हासो यस्या सा इयं शरद उन्मदोन्मत्ता कामिनीव युवतिरिव वो युष्माकमग्र्यां श्रेष्ठां प्रीतिं प्रेम प्रतिदिशतु यच्छतु । मालिनीवृत्तम् ॥ २८ ॥

इति महाकविश्रीकालिदासकृतऋतुसंहारव्याख्यायां बालबोधिन्यां
तृतीयः सर्गः ॥



१ X. कान्तिः. जनितरुचिरहासा जनितरुचिरकान्तिः २ चोन्मदेयम्, चोन्मदाय. ३ B. K. उपदिशतु परिदिशतु. ४ B. चेतसःसु, चेतसि. ५ इमाम् K. अमाम्,

चतुर्थः सर्गः

हेमन्तवर्णनम् ।

अथ क्रमागतं हेमन्तं वर्णयति ।

नवप्रवालोद्गमसस्यरम्यः
प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतः प्रिये ॥ १ ॥

नवेति । हे प्रिये नवानां नवीनानां प्रवालानां पर्णानामुद्गम उत्पत्तिः सस्यानि कृषिफलानि च तैः रम्यो मनोहरः । प्रफुल्ला उत्फुल्ला संजातपुष्पा इति यावत् लोध्रा गालववृक्षा यस्मिन् "गालवः शाबरो लोध्रः" इत्यमरः । परिणताः पक्वाः शालयः कलमा यस्मिन्सः । विलीनानि ग्लानानि पद्मानि यस्मिन् सः प्रपतंस्तुषारो हिमं यस्मिन् स अयं हेमन्तकालः समुपागतः सम्यक्तया प्राप्तः । उपेन्द्रवज्रावृत्तम् तल्लक्षणम् "उपेन्द्रवज्रा जतजास्ततोगौ" इति ॥ १ ॥

मनोहरैः कुङ्कुमरागरक्तै-
स्तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीनां
नालंक्रियन्ते स्तनमण्डलानि ॥ २ ॥

मनोहरैरिति । स्तनैरुरोजैः शालन्ते शोभन्ते ताः स्तनशालिन्यस्तासां विलासिनां स्तनमण्डलानि कुचकुम्भा मनोहरैः कुङ्कुमस्य काश्मीरजस्य रागेण रक्ता लोहितास्तैः । तुषारस्तुहिनं कुन्दं माघ्यकुसुममिन्दुश्चन्द्रश्च तन्निभाः सदृशास्तैश्च हारैः कुङ्कुमरागाद्रक्तैः स्वच्छ शुभ्रैरिति द्विविधैर्हारैरित्यर्थः । नालंक्रियन्ते न भूष्यन्ते रमणैरिति शेषः । केचित्तु नालंक्रियन्त इत्ययमेव पाठः उत्तरश्लोकानुगुणः उत्तरत्रालंकारधारणाभावस्य वर्णितत्वादित्याहुः । अन्ये तु नालंक्रियन्त इति पाठो न समीचीनः । धारणाभावे हाराणां कुङ्कुमरक्तत्वं नैव संभवति अतोऽलंक्रियन्त इत्येव पाठः सम्यक् शैत्यादलंकारत्यागेऽपि कुङ्कुमविलेपनेन समुत्पन्नोष्म्याणां स्तनानामुपर्यलंकारधारणस्यैव योग्यत्वात् । सर्वालंकारत्यागेऽपि मौक्तिकमालाधारणेऽत्यादरो युवतीनां प्रदर्शितोऽनेन वर्णनेन । यदि तु नालंकि-

---

१ यत्र २ K. पुष्प ३ गतागुपद्म . विलीनपद्मः. ४ B. N. D. ५ मनोरमैः ६ B. कुङ्कुमरागपिङ्गैः. कुङ्कुमरागपिङ्गैः चन्दनैः ७ नवयौवनानाम्. ८ K. N. D. अलंक्रियन्ते.

यन्त इति पाठ एवाप्रस्तुतः "चन्दनगौरैः" इति पाठो ग्राह्यः । चन्द-नस्य शीतस्पर्शत्वेनावरणेन तेनातिरिक्तशैत्यं स्यादित्यर्थ इति वदन्ति ॥ २ ॥

न बाहुयुग्मेषु विलासिनीनां
प्रयान्ति सङ्गं वलयाङ्गदानि ।
नितम्बबिम्बेषु नवं दुकूलं
तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥

नेति । विलासिनीनां बाहुयुग्मेषु हस्तयुगलेषु वलयानि कटकान्यङ्गदानि केयूराणि च सङ्ग सम्बन्धं न प्रयान्ति न लभन्ते तेषां शीतस्पर्शत्वादिति भावः । नवं नूतनं दुकूलं क्षौमम् "क्षौमं दुकूलं स्या"दित्यमरः । नितम्बबिम्बेषु कटिपश्चाद्भागेषु । तनु सूक्ष्ममंशुकं वसनं कञ्चुकमिति पीनपयोधरेषु पुष्टस्तनेषु अत्र प्रतिवाक्यं प्रयान्तीति वचनविपरिणामेनान्वेति ॥ ३ ॥

काञ्चीगुणैः काञ्चनरत्नचित्रै-
र्नो भूषयन्ति प्रमदा नितम्बान् ।
न नूपुरैर्हंसरुतं भजद्भिः
पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥ ४ ॥

काञ्चीति । प्रमदाः स्त्रियो नितम्बान् कटिपश्चाद्भागान् काञ्चनेन स्वर्णेन रत्नैर्मणिभिश्च चित्रैर्विचित्रैश्चमत्कृतैरिति यावत् । काञ्चीगुणैः रशनादाम-भिर्नो भूषयन्ति नालङ्कुर्वन्ति । अम्बुजस्य पद्मस्य कान्तिं शोभां भजन्तीति तानि पादाम्बुजानि चरणसरोरुहाणि हंसरुतं मरालशब्दं भजद्भिः सेवमानैरनुकुर्वद्भिरिति यावत् । नूपुरैः पादभूषणैर्न भूषयन्ति । पादाम्बुजान्यम्बुजकान्तिभाञ्जि पुनरुक्तम् । पादाम्बुजान्यम्बुजकोमलानीति पाठे शुभयानैर्भवेद्यत्र शोभित शोभा । पादाम्बु-जानामम्बुजस्य शोभा हंसरुतं भजद्भिर्नूपुरैः शोभयन्त्यर्थः । उपजातिवृत्तम् । "स्यादिन्द्रवज्रा यदि तौ जगौ गः उपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" इति लक्षणात् ॥ ४ ॥

गात्राणि कालीयकचर्चितानि
सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि
कुर्वन्ति नार्यः सुरतोत्सवाय ॥ ५ ॥

---

१ J २ 'केयू' ३ वसन. ४ नितम्बे ५ B. न ६ D. N. नितम्बान् ७ पादाम्बुजान्यम्बुजकोमलानि ८ [illegible] ९ [illegible]म्बुजानि.
१० D. [illegible].

गात्राणीति । नार्य प्रमदा सुरतोत्सवाय सुरतक्रीडायै गात्राण्यवयवा कालीयकेन नायकेन पीतचन्दनेन चाचितानि लिप्तानि कुर्वन्ति । मुखाम्बुजानि वदनकमलानि पत्रलेखया कपोले कस्तूरिकाकाञ्चनाविशेषेण महितानि । शिरांसि कालागुरुणा कृष्णचन्दनेन धूपितानि वासितानि कुर्वन्ति ॥ नखाम्बुजानीति पाठोऽपि सुगम । नखाना प्रमदाभिश्चर्नीकरणस्य प्रसिद्धत्वात् ॥ ॰ ॥

रतिश्रमक्षामविपाण्डुवक्त्रा
संप्राप्तेऽपि हर्षाभ्युदये तरुण्य ।
हसन्ति नोच्चैर्दशनाग्रभिन्नान्
प्रपीड्यमानानधरानवेक्ष्य ॥ ६ ॥ ।१

रतेति । रतिश्रमेण सुरतश्रमेण क्षाम कृश विपाण्डु पाण्डुर वक्त्र यासा ता स्तरुण्य । हर्षस्यानन्दस्याभ्युदय उदये प्राप्तेऽपि । दशनाना रदनानामग्रै कोटिभि॰ भिन्नान् छिन्नान् अतएव प्रपीड्यमानानधरानवेक्ष्योच्चैर्न हसन्ति । दशनपीडा चा धरगणा चुम्बन इत्यर्थ । हास्यसमये पीडाधिक्य जायते विशेषतो हिमकाल इति ह्यनुभवसिद्धम् ॥ ६ ॥

पीनस्तनोरःस्थलभागशोभा
मासाद्य तत्पीडनजातखेद ।
तृणाग्रलग्नैस्तुहिनै पतद्भि
राक्रन्दतीवोषसि शीतकाल ॥ ७ ॥

पीनेति । पीनौ पुष्टौ स्तनौ यस्मिंस्तादृशस्योरःस्थलभागस्य वक्षस शोभा कान्तिम् । कान्तिमदुरःस्थलमित्यर्थ । आसाद्य प्राप्य । "सविशेषणौ हि विधिनिषेधौ विशेषणमुपसंक्रामत सति विशेष्य बाध" इति न्यायेन शोभाया प्राप्त्यसंभवे तद्विशेषणभूतोरःस्थलस्य प्राप्तिरिति भाव । स्वशीतापनोदार्थं शीतकालेन स्तनाश्रय कृत इति तात्पर्यार्थं । स्तनोरःस्थलेति पाठे स्तनौ चोरःस्थल च स्तनोरःस्थलम् । प्राण्यङ्गत्वादेकवद्भाव । तस्य शोभाम् । शोभितस्तनोरःस्थलमित्यर्थ । तत्पीडनेन स्तनादीना पीडनेन जात उत्पन्न खेदो दुःख यस्य स स्तनमर्दनजन्यव्यथा तत्स्थस्यापि मर्दनाद् दुःखमिति भाव । शीतकाल उषसि प्रत्यूषे तृणाग्रेषु घासाग्रभागेषु लग्नै संसक्तै पतद्भिस्तुहिनै रश्रुवत् । "दव" इति भाषायाम् । आक्रन्दतीव व्याक्रोशतीव । अत्र प्रातस्तु नस्तनमनुरागेण पुरुषादिपीडनेन दुःखितस्य शीतकालस्य रोदनानुवेनो त्प्रेक्षा तत्त्वमनुप्रेक्षाकार । केचित्तु भागशोभामित्यस्य एकस्य स्थितिमित्यर्थ इति

---

१ B शर्मातिशयादुत्सवात् २ B. प्राप्तेऽधहर्षाभ्युदयम्, प्रभातिहर्षाभ्युदये D N सम्प्राप्तहर्षाभ्युदया ३ नोच्चै ४ K प्रभिन्नरागान्, भग्नरतरागान् B ऋतुचर, ६ भाग ३ लग्नै

वदन्ति । अन्ये तु आनायैलम्बत्वमित्यर्थं । तुषारैर्मिलितपदार्थदुरवलोकनेन च दुःखं शीतकालस्येति कथयन्ति ॥ ७ ॥

प्रभूतशालिप्रसवैश्चितानि
मृगाङ्गनायूथविभूषितानि ।
मनोहरक्रौञ्चनिनादितानि
सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥

प्रभूतेति । प्रभूतैर्बहुलैः शालिप्रसवैः कलमोद्गमैश्चितानि व्याप्तानि । मृगाङ्गनानां हरिणीनां यूथेन समूहेन विभूषितान्यलंकृतानि मनोहरैः सुन्दरैः क्रौञ्चैः पक्षिविशेषैर्निनादितानि प्रतिशब्दितानि सीमान्तराणि ग्रामान्तभागाश्चेतो मानसम् रसिकस्येति शेषः । उत्सुकयन्त्युत्कण्ठायुक्तं कुर्वन्ति ॥ ८ ॥

प्रफुल्लनीलोत्पलशोभितानि
सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सशैवलानि
सरांसि चेतांसि हरन्ति पुंसाम् ॥ ९ ॥

प्रफुल्लेति । प्रफुल्लैर्विकसितैर्नीलोत्पलैः शोभितानि । सोन्मादैरुन्मत्तैः कादम्बैः कलहंसैः । "बदक" इति महाराष्ट्रभाषायाम् । विभूषितानि प्रसन्नं स्वच्छं तोयमुदकं येषां तानि । शैवलेन सहितानि सरांसि सरोवराणि पुंसां चेतांसि हरन्त्याकर्षयन्ति । शारदिककादम्बविघट्टितानीति पाठस्तु न समीचीनः शरदृणां पक्षिविशेषाणां समुद्रवासिनां सरःस्ववस्थानासंभवात् ॥ ९ ॥

अनेन श्लोकेन स च तदवलोकनेन एव कुतूहलीत्यवगम्यते । अद्य सोऽपि संगमस्मारकत्वेन रम्योदकमिव कालिदासकाव्यमध्यस्थो वन्दनीय इति व्याख्यायते ।

*मार्गं निरीक्ष्यातिनिरस्तनीरं
प्रवासखिन्नं पतिमुद्वहन्त्यः ।
प्रवेक्ष्यमाणा हरिणेक्षणाक्ष्य-
प्रबोधयन्तीव मनोरथानि ॥ १ ॥

मार्गमिति । अत्र मनोरथानीति लिङ्गव्यत्ययः कुकवेर्भ्रान्तिर्वा । अतो

---

१ प्रभृति. २ प्रचय.. ३ विलसितानि. ४ प्रभूत. ५ भूषितानि. ६ B. शारदिककादम्बविघट्टितानि. शारदिककादम्बविघट्टितानि. सदंशकादम्बविघट्टितानि. ७ प्रपु". ८ J. D. G. N. सुमोत्कलानि. ९ सूनाम.

* B. D. J. and J. 2 do not print this verse. G. and N. print it as an interpolation

" मनोरथान् हि " इति पाठो व्याख्यासौलभ्यायाङ्गीक्रियते । मनोरथानेव कुर्मं इति विहराम इत्यादीन् उद्वहन्त्यो धारयन्त्यो हरिणेक्षणे इव मृगनेत्र इवाक्षिणी नयने यासां ता कामिन्य । अतिनिरस्त नष्ट नीरमुदक यस्मात्तान्श मार्गं निरीक्ष्यावलोक्य । समागम प्रवासकाल इति विचिन्त्येत्यर्थ । प्रवासे प्रवसने खिन्न दु खित पति भर्तार प्रेक्ष्यमाणा वा प्रवाक्षमाणा इत्यपेक्षितम् । प्रबोध माणा पश्यन्त्य प्रबोधयन्तीव मनोरथानुद्दीपयन्तीव । खिन्नो भर्ता प्रवासाय न गच्छत्विति स्वमनोरथा पूर्णा भविष्यन्तीत्यवगम्य तान वर्धयन्तीवेति व्याख्येयम् ॥

पाकं व्रजन्ती हिमजातशीतै
राधूयमाना सततं मरुद्भि ।
प्रिये प्रियङ्गु प्रियविप्रयुक्ता
विपाण्डुतां याति विलासिनीव ॥ १० ॥

पाकमिति । हे प्रिये हिमेन तुहिनेन जातान्युत्पन्नानि यानि शीतानि तै पाक परिपाक व्रजन्ती गच्छन्ती । मरुद्भि पवनैराधूयमाना कम्पमाना प्रियङ्गु श्यामालता । ' वाघाटी '' इति महाराष्ट्रभाषायाम् । प्रियेण कान्तेन विप्रयुक्ता वियुक्ता । विलासिनीव सुन्दरीव विपाण्डुता पाण्डुत्व याति गच्छति । उपमालंकार १०

पुष्पासवामोदसुगन्धिवक्त्रो
निश्वासवातै सुरभीकृताङ्ग ।
परस्पराङ्गव्यतिषङ्गशायी
शेते जन कामशरानुविद्ध ॥ ११ ॥

पुष्पेति । पुष्पासवस्य कुसुमोद्भवस्य मद्यविशेषस्यामोदेन सुवासेन सुगन्धि सुरभि वक्त्रम् आननं यस्य स । निश्वासाना श्वासाना वातै पवनै सुरभीकृत सुगन्धित श्च कृतम् शरीर यस्य स । कामशरैर्मदनबाणैरनुविद्धस्ताडित परस्पराङ्गानाम न्योन्यशरीराणा व्यतिषङ्ग सङ्ग तेन यस्मिन्यथा स्यात्तथा शेते च जन लोक । कामिपुरुष इति यावत् । एवं कामिपुरुषस्य परस्परसुरतसंभोगदर्शनसुखेन निर्दिष्टत्वमिति भाव । परस्पराङ्गव्यतिषक्त इति पाठो न युक्त व्यतिषिक्त इत्यस्य भिन्न इत्यर्थात् व्यतिषिक्त इत्यस्य गलत इति व्याख्यान प्रमादमूलकमेव ॥ ११ ॥

दन्तच्छदै सव्रणदन्तचिह्नै
स्तनैश्च पाण्यग्रकृताभिलेखै ।

---

१ B पचन्ति गच्छन्ति शीतवातै २ मधुगन्धामोद ३ D आमोद ४ कृताङ्ग ५ B. K व्यतिषङ्ग D G N J. व्यतिषक्त व्यतिषिक्त व्यतिगत प्रतिलिप्तदेह ६ N J मम ... कामशरानुविद्धै । ८ पाणिनखाग्रकृतैश्च

संसूच्यते निर्दयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥ १२ ॥

दन्तच्छदैरिति । नवयौवनानां तरुणीनाम् । व्रणेन क्षतेन सहितानि दन्तचिह्नानि स्फाटकानि येषु तैः दन्तैश्छाद्यन्ते यैस्तैर्दन्तच्छदैरधरोष्ठैः । पाण्यग्रैः करार्ग्रैर्नखैरिति यावत्कृतोऽभिलिख्यः सुरतकालोत्पादितं चिह्नं येषु तैः स्तनैः कुचैश्च निर्दयं दयारहितं यथा स्यात्तथा। "तस्मादेषा रहसि भवता निर्दयं पीडनीया। मन्दाक्रान्ता विसृजति रसं नेक्षुयष्टिः समग्रम्" इति केनापि कविनोक्तप्रकारेण यथाप्रस्तावेऽर्थः । रतोपभोगः सुरतोपभोगः संसूच्यते ज्ञाप्यते ॥ १२ ॥

काचिद्विभूषयति दर्पणयुक्तहस्ता
बाला विलोलचिकुरं वदनारविन्दम् ।
दन्तच्छदं प्रियतमेन निपीतसारं
दन्ताग्रभिन्नमवकृष्य निरीक्षते च ॥ १३ ॥

काचिदिति । दर्पणयुक्त आदर्शयुक्तो हस्तो यस्याः सा काचिद्बाला विलोलाश्चञ्चलाश्चिकुरा यस्य तद्वदनारविन्दमरविन्दमिव वदनम् । "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इत्यनेन समासः विभूषयति । प्रियतमेन प्राणनाथेन निपीतः सारो यस्य तं दन्ताग्रैर्भिन्नं चुम्बन इति शेषः दन्तच्छदमधरोष्ठमवकृष्य बहिराकृष्य निरीक्षते चावलोकते च। बालातपेषु वनितेति पाठे बालार्ककिरणेषु तिष्ठन्ती वनितेत्यर्थः ॥ १३ ॥

अन्या प्रकामसुरतश्रमखिन्नदेहा
रात्रिप्रजागरविपाटलनेत्रपद्मा ।
शय्यान्तदेशलुलिताकुलकेशपाशा
निद्रां प्रयाति मृदुसूर्यकराभितप्ता ॥ १४ ॥

अन्येति । प्रकामसुरतेनात्यन्तक्रीडया खिन्नो देहो यस्याः सा । रात्र्यां प्रजागरेण जागरणेन विपाटले आरक्ते नेत्रपद्मे नेत्रकमले यस्याः सा । शय्यान्तदेशे शय्यान्तप्रान्ते लुलितः लुण्ठितः आकुलः शिथिलः केशपाशः कबरीबन्धो यस्याः सा । स्रस्तांसदेशलुलितेति पाठे स्रस्तः पतितः मुक्त इति यावत् । अत एव अंसदेशे स्कन्धदेशे लुलित आकुलः केशपाशो यस्याः सेत्यर्थः । मृदुभिः

---

१ N. रतोपयोगः. २ J. G. N. D. सक्त. ३ J. G. N. D. बालातपेषु वनिता. ४ प्रियतमेश्च. ५ अपकृष्य. अनुकृष्य. ६ निरीक्षतेऽन्या. ७ B. K. अन्याः ८ B. K. भिन्नदेहा.. ९ B. नेत्रयुग्माः K. नेत्रपद्मा. १० N. J. D. स्रस्तांसदेश B. शयान्तरेषु. स्कन्धाङ्गदेश आस्कन्ददेश. ११ ललित. १२ B. K. पाशाः. १३ B. K. प्रयान्ति. १४ B. K. तप्ताः. दिननाथकराभितप्ताः.

कोमलैः सूर्यकरैरर्ककिरणैरभितप्ताऽन्याः काश्चित्स्त्रियः प्रयान्ति । रात्रिजागरखिन्न दास्याम्थिना भाति सूर्यकराभितप्ता हिमसमयेऽस्मिन्काले स्वपितीत्यर्थः ॥ १४ ॥

निर्माल्यदाम परिभुक्तमनोज्ञगन्धं
मूर्ध्नोऽपनीय घननीलशिरोरुहान्ताः ।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः
कुर्वन्ति केशरचनामपरास्तरुण्यः ॥ १५ ॥

निर्माल्येति । घना निविडा नीला कृष्णवर्णा शिरोरुहान्ता केशाग्राणि यासां ताः । पीना पीवरा उन्नता उच्चाः स्तनाः कुचास्तेषां भरेण भारेणानता किंचिन्नम्रा गात्रयष्टयो यासां ताः अपरास्तरुण्यः । परिभुक्त उपभुक्तो गन्धो यस्य तत् । निर्माल्यदाम भुक्तपूर्वां कुसुममालां मूर्ध्नोऽपनीय शिरसो दूरीकृत्य केशरचनां कवरीबन्धं कुर्वन्ति । अङ्गना हि प्रातरुत्थाय शिरसो माल्यान्यपनीय कवरीं बध्नन्तीत्यर्थः ॥ १५ ॥

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षान्विता विरचिताधरचारुशोभा ।
कूर्पासकं परिदधाति नखक्षताङ्गी
व्यालम्बिनीलललितालककुञ्चिताक्षी ॥ १६ ॥

अन्येति । प्रियेण रमणेन परिभुक्तमुपभुक्तं गात्रं शरीरमवेक्ष्य दृष्ट्वा । प्रविमर्दितमिति पाठे आलिङ्गनादिना परिमर्दितमित्यर्थः । हर्षान्विताऽऽनन्दयुक्ता । विरचिता कृताऽधरस्य चारुर्मनोहरा शोभा यया सा । दन्तक्षतानि गोपयितुं कुङ्कुमादिना ताम्बूलेन वा रञ्जितोऽधरो ययेति तात्पर्यार्थः । व्यालम्बिनो लम्बमाना नीलाः कवरीबन्धने ललिता इतस्ततः पतिता येऽलकाः केशास्तैराकुञ्चिते अक्षिणी नेत्रे यस्याः सा । कञ्चुकधारणवेलायां तैलेन मा मलिना मा भवन्त्विति केशान् मुखोपरि संस्थाप्य परिदधाति कञ्चुकं कामिनी । प्रातरुत्थाय विमुक्तानां केशानां बन्धनं परिहर्तुमन्योपायाभावात् । तदनुरोधेनेयमुक्तिः । व्यालम्बिनील-ललितालककुञ्चिताक्षीति पाठे व्यालम्बिभिर्नीलैर्ललितैर्मनोहरैरलकैः केशैः कुञ्चिते आकुञ्चिते अक्षिणी यस्याः सेत्यर्थः । व्यालम्बिनाङ्गुलिलताालककुञ्चिताक्षीति पाठस्तु व्यालम्बिनाभिरङ्गुलिलताभिरलक्षिता येऽलकास्तैः कुञ्चिते अक्षिणी यस्या इत्यभिप्रायेण नेयः । अस्मिन्पाठे प्रथमं केशपाशो व्यालम्बिताङ्गुलिभिर्धृत्वा पश्चात्कूर्पासकमङ्गना परिदधातीत्यर्थः कल्पनीयः । अन्यथा कूर्पासकधारणवेलायां

१ G. J. N D. परिभुक्त B परिभुक्त २ गन्धान्, ३ न्ताः ४ पीनोन्नतस्तनभरानतगात्रयष्ट्य ५ अपराः. ६ प्रविमर्दितम् ७ B रागः, गात्रं ८ G J कञ्चुकम् B, कूर्पासकम् ९ G. J. नखं गताङ्गी १० B. J व्यालम्बिनी ललितालककुञ्चिताक्षी G. N. व्यालम्बिनील- ११ व्यालम्बिनाङ्गुलिलता.

केशेष्वङ्गुलिसंचारस्याशक्यत्वात् । नखैः क्षतान्यङ्गानि गात्राणि यस्याः सा । रतिवेलायामिति शेषः । अन्या कूर्पासकं चोलम् "चोलः कूर्पासके पुमान्" इत्यमरः । दधाति धारयति । कुर्पासकं परिदधाति नवं नताङ्गीति पाठस्तु सुगमः ॥ १६ ॥

अन्याश्चिरं सुरतकेलिपरिश्रमेण
स्वेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः ।
संहृष्यमाणपुलकोरुपयोधरान्ता
अभ्यञ्जनं विदधति प्रमदाः सुशोभाः ॥ १७ ॥

अन्या इति । चिरं बहुकालं सुरतकेलिर्मदनलीला तस्याः परिश्रमेण स्वेदं घर्मं गताः प्राप्ताः प्रशिथिलीकृता गात्रयष्टयो यासां ताः । संहृष्यमाणः पुलको रोमाञ्चो यस्मिंस्तादृश उरुः पीवरः पयोधरान्तः स्तनप्रान्तो यासां ताः । स्वयमेव पृथुलाः स्तना रोमाञ्चोद्गमेन पृथुलतरा जाता इति तात्पर्यार्थः । अतएव सुष्ठु शोभा कान्तिर्यासां ताः प्रमदाः अभ्यञ्जनमभ्यङ्गं विदधत्याचरन्ति । श्रमापनोदाय खिन्नगात्रमर्दनमेवोपायः स च प्रमदाभिराप्तः ॥ १७ ॥

आशीर्वचनपूर्वकमुपसंहरति ।

बहुगुणरमणीयो योषितां चित्तहारी
परिणतबहुशालिव्याकुलग्रामसीमा ।
विनिपतिततुषारः क्रौञ्चमालापरीतः
प्रदिशतु हिमयुक्तः काल एष सुखं वः ॥ १८ ॥

इति श्रीकालिदासकृतावृतुसंहारे हेमन्तवर्णनं नाम
चतुर्थः सर्गः ॥ ४ ॥

बहुगुणेति । बहुभिरनेकैर्गुणैः रमणीयः योषितां स्त्रीणां चित्तहारी मनोहारी। उपभोगक्षमत्वादिति भावः । परिणतैः पक्वैर्बहुभिः शालिभिः कलमादिधान्यैर्व्याकुला सङ्कुला ग्रामसीमानो ग्रामान्ता यस्मिन् सः । विनिपतितास्तुषारा हिमानि यस्मिन् सः । क्रौञ्चानां मालाभिः पङ्क्तिभिः परीतो युक्त एष कालो हेमन्तर्तुर्वो युष्मभ्यं सुखं प्रदिशतु ददातु । अत्र एष सुखमित्यत्र विसन्धिर्दोषस्तद्-

---

१ B G. N खेदं २ B. सपीड्यमानविपुलोरुपयोधरार्ता G K. सपीड्यमानविपुलो संहृष्यमानविपुलो संहृष्यमाणविपुलो ३ K अभ्यञ्जनम् नेत्राञ्जनम् ४ B सुशोभम् ५ इति बहुरमणीय ६ B G. J सीम. ७ K N D सततमतिमनोज्ञ ८ G J. क्रौञ्चनादोपगीत. B. क्रौञ्चनादोपनीत ९ उपदिशतु सुखं वः काल एषोऽतिरम्यः १० त्वेषकालम्. ११ B प्रियम्

पेक्षया काल एषोऽतिगम्य इति पाठ एव साधु । पर बहुष्वादर्शपुस्तकेषु स्थितत्वात्सोनाप्त । हिमयुक्तस्त्वेष काल इति पाठे निरर्थकतुशब्दसमहोत' सोपि त्याज्य एवेत्यलम् ॥ १९ ॥

इति महाकविश्रीकालिदासकृतऋतुसंहारव्याख्यायां बालबोधिन्यां
चतुर्थः सर्गः ॥



पंचमः सर्गः

शिशिरवर्णनम् ।

अथ क्रमप्राप्तं शिशिरं वर्णयति ।

प्ररूढशालीक्षुचयावृतक्षितिं
क्वचित्स्थितक्रौञ्चनिनादराजितम् ।
प्रकामकामं प्रमदाजनप्रियं
वरोरु कालं शिशिराह्वयं शृणु ॥ १ ॥

प्ररूढेति । वरावूरुमावृत्त यस्यास्तत्सम्बोधने हे वरोरु । प्ररूढानां प्रवृद्धानां शालीनां कलमानामिक्षूणां च चयैः समूहैरावृता वेष्टिता क्षितिः पृथ्वी यस्मिन्तम् । क्वचित्क्वचित् स्थितानामुपविष्टानां क्रौञ्चानाम् निनादैः कूजितैः राजितम् शोभितम् । प्रकामम् यथेष्टं कामो मदनो यस्मिन्तम् । "प्रकामं तु निपेवेत मैथुनं शिशिरागमे" इति वैद्यशास्त्रेण कामाधिक्यस्य प्रतिपादितत्वात् । अतएव प्रमदाजनस्य युवति-जनस्य प्रियम् स्त्रीणां मदनाधिक्यादस्मिन् कामाधिक्येन प्रियतमोऽयमृतुस्तादृशम् । शिशिर इत्याह्वयोऽभिधानं यस्य तं कालं शिशिरर्तुं शृणु निशामय । अ-थवाह्वय । आह्वये अभिधानं च' इत्यमरः । क्रौञ्चेति पदमनुप्रासत्वेन पर्यवसान-मनोरम सूक्ष्मबिन्दुभिरसौ पदाभावात् गच्छति उत्तमम् लक्षणं पूर्वममुनम् ॥ १ ॥

निरुद्धवातायनमन्दिरोदरं
हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यबलाः सयौवनाः
प्रयान्ति कालेऽत्र जनस्य सेव्यताम् ॥ २ ॥

निरुद्धेति । निरुद्धान्यावरणेनाच्छादनानि यानि वातायनानि जालानि यस्य तच्च तन्मन्दिरमगारं तस्योदरं मध्यभागः । "मन्दिरं नगरेऽगारे" इति मेदिनी। हुताशनो वैश्वानरः । भानुमतोऽनन्तरं गभस्तयो रश्मयः । गुरूणि जडानि वस्त्राणि वसनानि । ऊर्णानिर्माणानि यावत् । सयौवना अबलास्तरुण्यः स्त्रिय इत्यर्थानि अत्र कालेऽस्मिन्नेव जनस्य लोकस्य सेव्यतामुपभोग्यतां प्रयान्ति गच्छन्ति ॥ २ ॥

---

१ B 'प्ररूढशालस्यचया' K 'प्ररूढशालप्रथैमनोहरम' 'प्ररूढशालीक्षुचयैर्मनोहरम' N 'प्ररूढशालयुक्चयैर्मनोहरम' 'प्ररूढ०' २ B 'निहादित' J 'स्थितस्य' 'विनिश्चित' 'विनिःस्वनत' ३ J 'शोभितम' ४ D 'प्रकामरम.' 'प्रमोदहेतुम' ५ 'शि-शेस्य' ६ B अथ.

न चन्दनं चन्द्रमरीचिशीतलं
न हर्म्यपृष्ठं शरदिन्दुसुन्दरम्।
न वायवः सान्द्रतुषारशीतला
जनस्य चित्तं रमयन्ति सांप्रतम्॥ ३॥

नेति। साम्प्रतमस्मिन्शीतकाले चन्द्रमरीचिशीतलमित्युभयत्रान्वेति। चन्द्रस्य मरीचयः किरणा इव शीतलं शीतं चन्दनम्। तथा चन्द्रमरीचिभिः शीतलं शरदिन्दुवत्सुन्दरं मनोहरम्। शरदिन्दुनिर्मलमिति पाठे शरदिन्दुवन्निर्मलं स्वच्छं सुधालिप्तत्वादिति भावः। हर्म्यपृष्ठं धनिवासगृहोपरिभूमि "गच्ची" इति महाराष्ट्रभाषायाम्। सान्द्रैर्घनैस्तुषारैस्तुहिनैः शीतला वायवश्चैते जनस्य चित्तं मानसं न रमयन्ति नानन्दयन्ति॥ ३॥

तुषारसंघातनिपातशीतलाः
शशाङ्कभाभिः शिशिरीकृताः पुनः।
विपाण्डुतारागणचारुभूषणा
जनस्य सेव्या न भवन्ति रात्रयः॥ ४॥

तुषारेति। तुषाराणां तुहिनानां संघातस्य समूहस्य निपातेन पतनेन शीतलाः शशाङ्कभाभिरिन्दुकान्तिभिः पुनरधिकमित्यर्थः शिशिरीकृताः। "कृभ्वस्तियोगे संपद्यकर्तरि च्विः" इत्यनेन च्विः। ननु तत्राभूततद्भावस्याभावाच्चोपादानेन च्विरिति न वाच्यम्। प्रायोऽभूततद्भाव इति वक्तव्यमिति वार्तिकमतानुसारिभिः प्रयुक्तत्वात्। विपाण्डुः पाण्डुरवर्णस्तारागणो नक्षत्रसमुदाय एव चारु मनोहरं भूषणमलंकारो यासां ता रात्रयो निशा जनस्य सेव्या न भवन्ति। विपाण्डुतारागणचित्रभूषिता इति पाठे तु विपाण्डुना तारागणेन चित्रं यथा स्यात्तथा भूषिता अलंकृता इत्यर्थः। न हि तारागणो गगनमेव मस्तकप्रदेशस्य निश्चितो येन स गगनालंकारो भवेत्प्रत्युत सकलदेशस्थत्वात् निशानामेव गात्राभूषणमिति युक्तम्॥ ४॥

गृहीततास्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः।
प्रकामकालागुरुधूपवासितं
विशन्ति शय्यागृहमुत्सुकाः

स्तवमेवोक्तं तृतीयश्लोकेऽत औष्ण्यजनकः कुङ्कुमादिरेवाङ्गरागो विलेपनपदेन ग्राह्यः। स्रजः कुसुममालाश्च याभिस्ताः पुष्पासवेन कुसुमजमद्येनाथवा पुष्पमिश्रिता-मद्येनामोदितं सुवासितं वक्त्रपङ्कजं मुखकमलं याभिस्ताः । सुमासवामोदि-तेति पाठे सुम. सुखकर इत्यर्थः । उत्कण्ठिताः स्त्रियः प्रेमसमन्वितं कालागुरोः कृष्णचन्दनस्य धूपेन वासितं सुगन्धितं गभ्यागृहं शयनमन्दिरं विशन्ति स्त्रीणामुत्सुकत्वं पुष्पस्रगादिसंनिधानेन मद्यसेवनेन चेति बोध्यम ॥ ५ ॥

कृतापराधान् बहुशोऽपि तर्जितान्
सवेपथून् साध्वसलुप्तचेतसः ।
निरीक्ष्य भर्तॄन्सुरताभिलाषिणः
स्त्रियोऽपराधान्समदा विसस्मरुः ॥ ६ ॥

कृतेति । समदा मदसहिता उन्मत्ता इति यावत् । एतेनापराधविस्मरणे कारणत्वं व्यज्यते । स्त्रियः कृता अपराधा मन्तवो येस्तान् "आगोऽपराधो मन्तुश्च" इत्यमरः । बहुशो वारंवारं तर्जितान् भर्त्सितानपि सवेपथून् वेपथुभिः कम्पैः सहितान् । साध्वसेन भीत्या लुप्तं नष्टं चेतो मानसं येषां तान् भर्तॄन् सुरतं संभोगमभिलषन्तीत्यभिलाषिणस्तथाविधान् निरीक्ष्य दृष्ट्वा अपराधानन्याङ्गनानिरीक्षणादीन् पूर्वकृतान् विसस्मरुः । तान् कटुभाषणादिभिर्नैव दूषयन्ति तत्प्रार्थनामनुमेनिर इत्यर्थः ॥ ६ ॥

प्रकामकामैर्युवभिः सुनिर्दयं
निशासु दीर्घास्वभिरामिताश्चिरम् ।
भ्रमन्ति मन्दं श्रमखेदितोरवः
क्षपावसाने नवयौवनाः स्त्रियः ॥ ७ ॥

प्रकामेति । प्रकाममत्यन्तं कामोऽभिलाषो मदनो वा येषां तैर्युवभिस्तरुणैरित्यनेन पीडायां सामर्थ्यं व्यज्यते दीर्घासु निशासु अस्मिन्नृतौ रात्रयो दीर्घाः सन्ति तदनुरोधेनेदम् । चिरं बहुकालं सुनिर्दयं दयारहितं यथास्यात्तथाऽभिरामिताः क्रीडिता उपभुक्ता इति यावत् रतिसुखेष्वत्यन्तं पीडिता इत्यर्थः । अत एव श्रमेण खेदिताः पीडिता ऊरवः सक्थीनि यासां ताः । नवयौवना नवं नूतनं यौवनं

---

१ 'बहुधाभितर्जितान्.' B. 'बहुशो वितर्जितान' 'अभितर्जितान्.' 'अभितर्जितान्.' २ B. 'मन्द.' ३ 'शयने.' ४ 'न.' ५ B. 'सुरतेश्च निर्दयम्' D. J. G. N. 'युवभि सनिर्दयम्' 'सुरतेऽति.' 'सुघनैःस.' ६ B. 'स्वतिपीडिताः.' K. 'स्वभिभाविताः' 'स्वभिभाविता भृशम्' 'गाढं दयितैश्चिरन्दम.' ७ J. D. भृशम्. ८ 'भवन्ति,' K. 'धमन्ति.' ९ 'अमन्थम.' 'मन्द.' १० G. J. N. D. खेदितोरवः 'मोदितोरवः' 'स्वेदितोरव .

तारुण्यं यासां ताः स्त्रियः नवयौवना इत्यनेन एवं रतिसुखानुभवक्षमत्वेन च पण्डितत्वं व्यज्यते । गाढ्या अवमानेन नाशं प्राप्तं कालं इत्यर्थः । मन्दं शनैर्भ्रमन्ति संचरन्ति । श्रमखेदितोरस इति पाठस्तु नात्यन्तमनोरमः उरःस्थलखेदनेन गमने विघ्नाभावादिति दिक् ॥ ७ ॥

मनोज्ञकूर्पासकपीडितस्तना-
सरागकौशेयविभूषितोरवः ।
निवेशितान्तःकुसुमैः शिरोरुहै-
र्विभूषयन्तीव हिमागमं स्त्रियः ॥ ८ ॥

मनोज्ञेति । मनोज्ञेन मनोहरेण कूर्पासकेन चोलकेन पीडिताः स्तनाः कुचा यासां ताः । अनेन कुचानामुन्नतत्वं पीवरत्वं च व्यज्यते । सरागं माञ्जिष्ठादिना रक्तं यत्कौशेयं क्षौमं तेन विभूषितावलंकृतौ ऊरू याभिस्ताः स्त्रियः । निवेशितानि स्थापितान्यन्तरन्तर्भागे कुसुमानि पुष्पाणि येषां तैः शिरोरुहैः केशैर्हिमागमं शीत कालं विभूषयन्तीवालंकुर्वन्तीव । अत्र प्रमदाभिः कृतं क्षौमादिधारणं हिमागमालंकरणत्वेनोत्प्रेक्षितमित्युत्प्रेक्षालङ्कारः ॥ ८ ॥

पयोधरैः कुङ्कुमरागपिञ्जरैः
सुखोपसेव्यैर्नवयौवनोन्नतैः ।
विलासिनीभिः परिपीडितोरसः
स्वपन्ति शीतं परिभूय कामिनः ॥ ९ ॥

पयोधरैरिति । विलासिनीभिः अस्य परिपीडितेत्यत्र कर्तृत्वेनान्वयः कुङ्कुमस्य काश्मीरजस्य रागेण पिञ्जरैः पीतवर्णैः । "पिञ्जरोऽश्वान्तरे क्लीबे स्वर्णे पीते चोक्तिमे" इति मेदिनी । सुखेनोपसेव्या उपभोग्यास्तैर्नवयौवनेनोन्नतैः पयोधरैः स्तनैः परिपीडितमुरःस्थलं येषां ते । अनेन कामिनीभिः स्वयंग्रहाश्लेषसुखेन दृढं परिपीडिता इत्यर्थो व्यज्यते । कामिनः शीतं तुहिनं परिभूय पराजित्य हिमपीडामलब्ध्वेत्यर्थः स्वपन्ति । हिमागमे उन्मदाभिः श्यामाभिः पीनकुचैर्दृढपरिरंभणेन कामिनां शीताभावः सहज एवेति भावः । वाग्भटोऽप्यस्मिन्नृतौ शीतनिवारणोपायमेवमाह "पीवरोरुस्तनश्रोण्यः समदाः प्रमदाः प्रियाः । हरन्ति शीतमुष्णाङ्ग्यो धूपकुङ्कुमयौवनैः" इति ॥ ९ ॥

सुगन्धिनिःश्वासविकम्पितोत्पलं

१ B. 'कूर्पासक.' 'कूर्पासकपरिपीडित.' २ J. G. N. D. 'विभूषितोरवः.' 'विभूषितोरसः.' ३ D. G. N. 'यौवनोन्नतैः' 'यौवनोद्गतैः.' 'यौवनोन्नतैः.' 'यौवनोद्भवैः.' ४ B. G. J. 'भृशम्.' ६ B. 'स्वपन्ति' 'शेरते.' ७ 'निःश्वास.' ८ 'दरम्' 'विकम्पितोत्पलम्'.

मनोहरं कामरतिप्रबोधकम् ।
निशासु हृष्टा सह कामिभिः स्त्रियः
पिबन्ति मद्यं मदनीयमुत्तमम् ॥ १० ॥

सुगन्धीति । हृष्टा आनन्दिताः स्त्रियः । निशासु रात्रिषु सुष्ठु गन्धो येषां ते सुगन्धयः । "गन्धस्येदुत्पूतिसुसुरभिभ्यः" इत्यनेन समासान्त इकारः । ते च ते निश्वासाश्च तैर्विकम्पितं चालितमुत्पलं यस्मिस्तत् । मनोहरं सुन्दरम् मदनीयमुन्मादकरमत एव कामरतिप्रबोधकं काममत्यन्तं रते सुरतस्य प्रबोधकमुत्तेजकम् । यद्वा कामे मदने या रतिः प्रेम तस्याः प्रबोधकम् । "रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययो"रिति मेदिनी । उत्तममुत्कृष्टं मद्यमासवं कामिभिः प्रियकरैः सह पिबन्ति प्राश्नन्ति ॥१०॥

अपगतमदरागा योषिदेका प्रभाते
कृतनिबिडकुचाग्रा पत्युरालिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं
व्रजति शयनगेहाद्वासमाकर्षयन्ती ॥ ११ ॥

अपगतेति । अपगतो नष्टो मदरागो यस्याः सा । पत्युः रमणस्यालिङ्गनेन कृतं निबिडं सान्द्रं कुचाग्रं चूचुकं यस्याः सा । एतेन गाढालिङ्गनं द्योत्यते । प्रियतमेन कान्तेन परिभुक्तमुपभुक्तं स्वदेहं स्वशरीरं वीक्षमाणा । वस्त्रं शिथिलं रात्रिस्खलमाकर्षयन्ती समीचीनतया स्थापयन्ती एका योषित् प्रभाते शयनगेहाद्व्रजति शय्यागृहान्निर्गच्छति । वासमन्यद्वसन्तीति पाठोऽसाधु. । वासशब्दस्य पुंस्त्वात् ।" वासः कुटी द्वयोः शाले"त्यमरः ॥ ११ ॥

अगुरुसुरभिधूपामोदितं केशपाशं
गलितकुसुममालं कुञ्चिताग्रं वहन्ती ।
त्यजति गुरुनितम्बा निम्ननाभिः सुमध्या
उषसि शयनमन्या कामिनी चारुशोभा ॥ १२ ॥

१ B. K. 'प्रबोधनम.' २ 'कृष्णासु च कामिनो जनाः' ३ 'एव' 'मद्याम्' ४ J. 'कृतविततकुचाग्रा' 'कुचनिबिडकुचा या' 'कृतदिवृतकुचाग्रा.' ५ D. B. 'वीक्ष्यमाणा'. ६ G. J. N. 'वासाद्वासमन्यद्वसन्ती.' 'वासाद्वासमन्यं हसन्ती' D 'वासाद्वासमन्यद्व्रजन्ती.' ७ 'आमोदितान' 'धूपाशोभितम्' 'कुसुमवासामोदितम्.' ८ 'केशपाशान्' ९ 'मालान.', १० D, N. 'नम्रनी कुञ्चिताग्रम्' B. 'धुन्वती कुञ्चिताग्रम्' 'धुन्वती कुञ्चिताग्रान्'. ११ N. D. 'निम्नमध्यावगाना' 'निम्नमध्यावनता. १२ B. 'प्युषसि' १३ B. 'शयनवासः' J. 'शयनवासम' D. 'शयनमध्या' १४ K. B. 'कामशोभा' 'कामशोभम' 'कामशोभाम्.'

अगुर्विति । अगुरोः कृष्णागुरोः सुरभिणा सुगन्धिना धूपेनामोदितं सुवासितं कृतसंस्कारमिति यावत् । माल्यिना,पिनिना कुसुममाला गुम्फ्यते यस्मात्तम् । कुञ्चितानि कुटिलान्यग्राणि यस्य तम् । एतेन केशपाशस्य चारुत्वं बोध्यते । केशपाशं केशसमूहम् । "पाश केशादिपूर्व स्यात्संघ" इति मेदिनी । वहन्ती धारयन्ती । तन्वतीति पाठे विस्तारयन्ती समीचीनतया केशान् स्थापयन्तीत्यर्थः । धुन्वतीत्यपि पाठः साधु । गुरू महान्तौ नितम्बौ यस्याः सा । निम्ना गभीरा नाभिर्यस्याः सा । सुष्ठु मध्यो यस्याः सा । चारुशोभा मनोहरकान्तिरस्य कामिना । उपसि प्रातःकाले शयनं सद्मं त्यजति । निम्नमध्यावसन्नेतिपाठे निम्नेन नतेन मध्येनावसन्ना खिन्नेत्यर्थः । सुमध्या उपसंत्यत्र विसन्धिरूपो दोष स निखिलदूषकतावीजं च बन्धपारुष्यम् । बन्धस्य गाढत्वे हि चमत्कारो नान्यथा । यत्तु "संहितैकपदे नित्या नित्या धातूपसर्गयो । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते" इति संहिताविवक्षाभावान्नात्र दोष इति समाधानं तत्साहित्यशास्त्रानवबोधमूलकम् । यद्ययं वैयाकरणोद्भावितो दोष स्यात् तदा संगच्छेतेदमुत्तरम् । परमयं न्यूनसंस्कृतिभिन्नो विसन्धिरूपो दोषस्तेन च दुष्टमिदं काव्यमिति दिक् ॥ १२ ॥

कनककमलकान्तैः सद्य एवाम्बुधौतैः[1]
श्रवणतटनिषक्तैः[3] पाटलोपान्तनेत्रैः ।
उपसि वदनबिम्बैरंससंसक्तकेशैः[4]
श्रिय इव गृहमध्ये संस्थिता[5] योषितोऽद्य[6] ॥ १३ ॥

कनकेति । सद्य एव तत्काल एवाम्बुभिरुदकैर्धौतैः क्षालितैः । कनककमलानीव सुवर्णपद्मानीव कान्तानि मनोहराणि तैः । इदं विशेषणं यद्यप्युभयत्र नेत्रयोर्मुखस्य चानुरूपं तथापि कमले कनकसम्बन्धत्वादस्माभिर्दूरान्वितमपि वदनबिम्बे योजितम् नेत्राणां पीतत्वस्याप्रसिद्धत्वादिति दिक् । वदनबिम्बैर्मुखमण्डलैरुपलक्षिताः । इत्थम्भूतलक्षणे तृतीया । "बिम्बं तु प्रतिबिम्बेऽपि मंडले पुंनपुंसकम्" इति मेदिनी । श्रवणतटे कर्णप्रान्ते निषक्तैः समासक्तैः । पाटलं ईषद्रक्तम् उपान्तं प्रान्तभागो येषां तानि नेत्राणि नयनानि तैः । अंसे स्कंधे संसक्तैः समासक्तैः केशैरुपलक्षिताः । योषितो नार्योऽद्यास्मिन्नृतौ गृहमध्ये श्रिय इव लक्ष्म्य इव संस्थिता उपविष्टाः । उपमालंकारः ॥ १३ ॥

पृथुजघनभरार्ताः किंचिदानम्रमध्याः[7]
स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः[8] ।

1 B. 'चारुताम्रप्ररोहैः' 'चारुबिम्बाधरोष्ठैः', 2 'स्मरदमृत' 3 D. 'निषिक्तैः,' B. 'नियुक्तैः,' 4 'अंससंयुक्त' 'हस्तसंयुक्त' 5 'संस्थिता.' 6 'योषितोऽद्य.' 7 'मध्या.' 8 'स्तनभ' 9 'व्रजन्त्यः'

सुरतसमयवेषं नैशमाशु प्रहाय
दधति दिवसयोग्यं वेषमन्यास्तरुण्य ॥ १४ ॥

पत्रिणीति । पृथुना पीवरेण जघनातिभरेण नीरणार्ता पीडिता । किंचि दान्ते मध्यो मध्यभागो यासां ता । स्तनभरस्य कुचभारस्य परिपादात्ताम्यन्त्य दन्त शनै शनैर्व्रजन्त्यो गच्छन्त्योऽन्यास्तरुण्य । नैश रात्रिसम्बन्धिन सुरत-समयस्य रतिकालस्य वेष नेपथ्य वसनादि । आशु तूर्ण प्रहाय त्यक्त्वा । दिवस योग्य गृहकर्मादिकस्य वेष नेपथ्य वसनादि दधति धारयन्ति । वेष इत्यस्याकार इत्यथा नात्र सनेत्म ॥ १४ ॥

नखपदाचितभागान्वीक्षमाणा स्तनाग्रान्
अधरकिसलयाग्रं दन्तभिन्नं स्पृशन्त्य ।
अभिमतरतिवेषं नन्दयन्त्यस्तरुण्य
सवितुरुदयकाले भूषयन्त्याननानि ॥ १५ ॥

नखपदेति । नखपदैर्नखक्षतैश्चिताञ्च्याप्तान् भागान् स्तनाग्रान् कुचाग्रान् वीक्षमाणा पश्यन्त्य । दन्तैर्दशनैर्भिन्न छिन्न चुम्बनक्रियायाम् इत्यर्थ । किस लयमिवाधर अधरकिसलयं तस्याग्र स्पृशन्त्य । एवम् अभिमतमभीष्टं रम शृङ्गारमित्यर्थ नन्दयन्त्य समानन्दयन्त्यस्तरुण्यो युवतय सवितु सूर्यस्योदयकाल आननानि मुखानि भूषयन्ति कुङ्कुमरागादिना ऽलङ्कुर्वन्तीत्यर्थ ॥ १५ ॥

आशीर्वचनपूर्वकमुपसंहरन् ।

प्रचुरगुडविकार स्वादुशालीक्षुरम्य
प्रबलसुरतकेलिर्जातकन्दर्पदर्प ।
प्रियजनरहितानां चित्तसंतापहेतु
शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम् ॥१६॥

इति श्रीकालिदासकृतावृतुसंहारे शिशिरवर्णन नाम
पञ्चम सर्गः ॥ ५ ॥

षष्ठः सर्गः

वसन्तवर्णनम्।

अथ क्रमागतं वसन्तकालं वर्णयति।

प्रफुल्लचूताङ्कुरतीक्ष्णसायको
द्विरेफमालाविलसद्धनुर्गुणः।
मनांसि वेद्धुं सुरतोत्सुकानां
वसन्तयोद्धा समुपागतः प्रिये ॥ १ ॥

प्रफुल्लेति। हे प्रिये ! प्रफुल्लस्य विकसितस्य चूतस्य सहकारस्यांकुरा एव स्तनेषु ... मालाविलसत्

भुजेषु सङ्गं वलयाङ्गदानि।
प्रयान्त्यनङ्गातुरमानसानां
नितम्बिनीनां जघनेषु काञ्च्यः ॥ ६ ॥

स्तनेष्विति। अनङ्गेन मदनेनातुरं पीडितं मानसं यासां तासां नितम्बिनीनां प्रशस्तनितम्बयुक्तानां स्तनेषु सितेन शुभ्रेण चन्दनेनार्द्रा हारा मुक्तामालाः। भुजेषु हस्तेषु वलयानि कटकान्यङ्गदानि केयूराणि च। जघनेषु कटिषु काञ्च्यो रसनाः। "जघनं तु स्त्रियाः श्रोणिपुरोभागे कटावपि" इति मेदिनी। सङ्गं संबन्धं प्रयान्ति गच्छन्ति लभन्त इत्यर्थः। प्रयान्ति निःशङ्कमनङ्गसौख्यमिति पाठे हारादयस्तत्तत्स्थानेषु निःशंकं तासां रमणाभिनिवृत्तिं यथास्यात्तथा मदनसौख्यं लभन्ते। आलिङ्गनादिकमनुभवन्तीत्यर्थः ॥ ६ ॥

सपत्रलेखेषु विलासिनीनां
वक्त्रेषु हेमाम्बुरुहोपमेषु।

---

१ B. 'रेशेषु' K. 'स्तनेषु हारा.' २ D. J. K. 'अशोकः' ३ K. 'सिता मृणालाः' B. 'सितास्तु कुन्दाः' 'सुतास्तु पुष्पाः' ४ B. 'नवमल्लिकाश्च' 'नवमालिकाश्च.' ५ B. 'प्रयान्ति सङ्गम्' 'प्रयान्ति शोभाम्.' ६ B. J. 'प्रमदाजनस्य' 'वनिताजनस्य.' ७ 'कुचेषु.' ८ B. 'मुखेषु.' ९ B. 'ताम्बूलसुगन्धिवाताः.' 'मुखेषु कर्पूरसुगन्धिवाताः.' K. 'कम्रवलयाङ्गदानि'. 'चमद्वलयाङ्गदानि.' १० B. K. 'प्रयान्ति निःशङ्कमनङ्गसौख्यम्.' 'निःशङ्कमनङ्गसौ-ख्यम्.' ११ B. 'विलासिनाङ्गान.' १२ 'मुखेषु.'

रत्यन्तरे मौक्तिकतुल्यरूप
स्वेदोद्गमो विस्तरतामुपैति ॥ ७ ॥

सपत्रलेखेष्विति । विलासिनीनां विलासवतीनां पत्ररेखैः पत्ररचनाभिः सहितेषु हेमाम्बुरुहस्योपमा येषां तेषु । अथवा हेमाम्बुरुहेण सुवर्णकमलेनोपमेषु सदृशेषु वक्त्रेष्वाननेषु रत्यन्तरे रतिमध्ये मौक्तिकैस्तुल्यं रूपं यस्य स मौक्तिकसदृशः स्वेदोद्गमो घर्मोद्गमो विस्तरतां विस्तृतभावमुपैति गच्छति । रत्नान्तरे-मौक्तिकसंगरम्य इति पाठो नातीव चारु यतो भूषाणां रत्नानां मध्ये मौक्तिकसङ्गेन रम्य इति हि तदर्थः । तदपेक्षया च रत्यन्तरे मौक्तिकतुल्यरूप इति पाठः सम्यक् ॥ ७ ॥

उच्छ्वासयन्त्यः श्लथबन्धनानि
गात्राणि कंदर्पसमाकुलानि ।
समीपवर्तिष्वपि कामुकेषु
समुत्सुका एव भवन्ति नार्यः ॥ ८ ॥

उच्छ्वासयन्त्य इति । श्लथानि शिथिलानि बन्धनान्यावरणानि कञ्चुकादीनि येषां तानि कंदर्पेण मदनेन समाकुलानि पीडितानि गात्राण्यवयवान् । उच्छ्वासयन्त्यः स्फारयन्त्यो नार्यः कामुकेषु प्रियेषु समीपवर्तिषु निकटस्थितेषु सत्स्वपि समुत्सुका उत्कण्ठिता भवन्ति । मदनावेशेन सञ्जातावयवस्फुरणा अनुभूतरतिसुखा नार्यो रमणानां निकटवर्तिनां प्रार्थनाद्यवधिमनपेक्ष्य स्वयं रतियाचनतत्परा भवन्तीति तात्पर्यार्थः । समीपवर्तिष्वपि कामुकेष्विति पाठे धुर्तादिकामुकेषु विद्यमानेष्वपि स्वयमुत्सुका जाता इत्यर्थः । उत्कुटिकामुकोपयत्नमकृत्वोत्कण्ठिता इति भावः ॥ ८ ॥

तनूनि पाण्डूनि समदन्थराणि
मुहुर्मुहुर्जृम्भणतत्पराणि ।
अङ्गान्यनङ्गः प्रमदाजनस्य
करोत्यसौ प्रोषितभर्तृकस्य ॥ ९ ॥

तनूनीति । असावनङ्गो मन्मथः प्रोषितः प्रवासी भर्ता यस्य तस्य प्रमदा-

१ D N 'रत्नान्तरे ' G. J 'रत्नान्तर.' रतान्तरे.' २ G. N. 'सदृशप्रभः ' J 'सदृशाकार ' 'सदृगतुल्यः ' ३ G N 'स्वेदागम ' ४ B 'उच्छ्वासयन्त्यः ' ५ D G N 'स्वधुना प्रियेषु ' K 'स्वपि कामुकेषु ' 'स्वपि नायकेषु ' ६ 'घनानि ' ७ B. 'गुरुम्भितानि ' J 'मदालसानि ' ८ 'असकृत् ' ९ J 'तारुण्यरसेन युक्तानि ' D G N. 'लावण्यरसप्रभाणि.' 'लावण्यसम्पोत्तराणि '.

जनस्य युवतिजनस्याङ्गान्यवयवान् तनूनि कृशानि पाण्डूनि पाण्डुवर्णानि सञ्जातपुलकानि [illegible] वहितानि जृम्भालसं मुहुर्मुहुश्चकार जृम्भा "[illegible]" इति [illegible] [illegible] करोति स्मानि ॥ ९ ॥

नेत्रेषु लोलो मदिरालसेषु
गण्डेषु पाण्डुः कठिनः स्तनेषु ।
मध्येषु निम्नो जघनेषु पीनः
स्त्रीणामनङ्गो बहुधा स्थितोऽद्य ॥ १० ॥

नेत्रेष्विति । स्त्रीणां युवतीनां मदिरया मद्येन अलसानि जडानि तेषु नेत्रेषु चलश्चपलः । गण्डेषु गल्लेषु पाण्डुः पाण्डुरः स्तनेषु कुचेषु कठिनः मध्येषु मध्यभागेषु निम्नो गभीरः । जघनेषु पीनः पुष्टः [illegible] बहुधा बहुभिः प्रकारैरद्यानङ्गो मदनः स्थितः । अनेकस्यैव [illegible] [illegible] "एकस्य बहुष्वेकैकवृत्तौ विपर्ययेऽपि [illegible]" ॥ १० ॥

अङ्गानि निद्रालसविभ्रमाणि
वाक्यानि किंचिन्मदलालसानि ।
भ्रूक्षेपजिह्मानि च वीक्षितानि
करोति कामः प्रमदाजनस्य ॥ ११ ॥

अङ्गानीति । कामो मदनः प्रमदाजनस्य युवतिजनस्याङ्गानि अवयवान् निद्रया [illegible] विभ्रमा [illegible] तानि । "अङ्गं गात्र" इति मेदिनी । निद्रालसविजृम्भितानि [illegible] सुगमम् । किं च वाक्यानि किंचिन्मदेन मदेन लालसानि [illegible] । "लालसो [illegible]" इति हैमः । तथा च [illegible] वीक्षितान्यवलोकनानि भ्रुवोः [illegible] [illegible] [illegible] करोति । तत्रापि [illegible] मदनकृतं युवतिजनस्याङ्गानां निद्रालस्यादिकमपि परोक्षाना-[illegible] प्रयोग इति [illegible] ॥ ११ ॥

प्रियङ्गुकालीयककुङ्कुमाक्तं
स्तनेषु गौरेषु विलासिनीभिः ।

---

१ D 'लोलम' K '[illegible]' २ 'मदिरालसेषु' ३ 'कठिनस्तनेषु' ४ B K 'नम्र' ५ 'बहुधा' K '[illegible]' B '[illegible]' ६ B K 'मदिरालसानि' 'मन्मथालसानि' ८ B 'विलोकितानि' ९ J G N D 'चकार' १० 'प्रमदोजनानाम' 'प्रमदाजनस्य' ११ B J '[illegible]' १२ B 'स्तनाग्रभागेषु विचित्रितानि' K 'स्तनाङ्गभागेषु [illegible]-तानि'

श्चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः
पर्युत्सुकं मानसमङ्गनानाम् ॥ १५ ॥

ताम्रेति । ताम्राणां रक्तानां प्रवालानां पर्णानां स्तबकैर्गुच्छैरवनम्रा नताः । पुष्पिताः संजातकुसुमा मनोहराः शाखाः स्कंधा येषां ते " तदस्यसंजातंतारका-दिभ्य इतच्" इत्यनेनेतच्प्रत्यय पुष्पशब्दात् । पवनेन समीरणेनावधूताः कम्पिताश्चूतद्रुमा आम्रवृक्षा अङ्गनानां युवतीनां मानसं काममत्यन्तं पर्युत्सुकमुत्कण्ठितं कुर्वन्ति । वसन्ते चूतमञ्जरीमवलोक्य प्रमदा उत्कण्ठिता भवन्तीत्ययं चूतप्रसवस्य मदनबाणत्वेनोत्कण्ठाजनकत्वं युक्तमेव ॥ १५ ॥

आ मूलतो विद्रुमरागताम्रं
सपल्लवाः पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥ १६ ॥

आमूलत इति । आमूलतो मूलादारभ्य विद्रुमस्य प्रवालस्य राग इव ताम्रं रक्तवर्णं पुष्पचयं कुसुमसमूहं दधानाः सपल्लवाः पर्णसहिता अशोका वञ्जुलवृक्षा निरीक्ष्यमाणा दृश्यमाना नवयौवनानां नूतनतारुण्यानां प्रमदानां हृदयं मानसं सशोकं कुर्वन्ति । अशोका न शोको येभ्य इदृशा अपि हृदयं सशोकं कुर्वन्त्यतोऽकारणात्कार्यजन्मरूपो विभावनालंकारः । नवयौवना स्वयं कान्तसमागमसुपसर्पणे भारवोऽतस्तासां हृदयं पीडितं भवतीति भावः ॥ १६ ॥

मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितनम्रमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥ १७ ॥

मत्तेति । मत्तैरुन्मत्तैर्द्विरेफैर्भ्रमरैः परिचुम्बितानि संस्पृष्टानि चारूणि पुष्पाणि कुसुमानि यासां ताः मन्दानिलेन मृदुना पवनेनाकुलिता व्याकुलिताः चालिता इति यावत् अतएव नम्रा नता मृदुप्रवालाः कोमलपल्लवा यासां ता बाला नूतना

१ 'कान्ते.' 'सान्द्राः' २ 'पवनाभिभूताः' ३ B 'समुत्सुकत्वं मनसः' K. 'समुत्सुकम्' 'पर्युत्सुकत्वं मनसः' ४ B K. 'ताम्रा' ५ B K 'सपल्लवम्' ६ B K 'चारु' 'चारुतर.' ७ 'मनसश्च समुत्सुकत्वम्.' ८ D N 'चूताभिरामकलिकाः' B 'बालातिमुक्तकलिकाः.' 'चूता विमुक्तकलिका.'

आलिप्यते चन्दनमङ्गनाभि-
र्मदालसाभिर्मृगनाभियुक्तम् ॥ १२ ॥

नितम्बिनीति । मदेनालसाभिर्जडाभिर्विलासिनीभिर्विलासवतीभिरङ्गनाभिर्युवतिभिः गौरेषु गौरवर्णेषु स्तनेषु कुचेषु प्रिय इति श्यामालता कालीयकं पीतचन्दनं कुङ्कुमं काश्मीरजं तैरवत्तं युक्तं मृगनाभिः कस्तूरिका तया च युक्तं चन्दनं मलयजमालिप्यते चर्च्यते । " मृगनाभिर्मृगमदः कस्तूरी " इत्यमरः ॥ १२ ॥

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः काममदालसाङ्गः ॥ १३ ॥

गुरूणीति । कामस्य मदेनालसान्यङ्गान्यवयवा यस्य स । कामशरानुविद्ध इति पाठे कामशरेणानुविद्धस्ताडित इत्यर्थः जनो गुरूणि जडानि वासांसि वसनानि तूर्णं क्षिप्रं विहाय त्यक्त्वा लाक्षारसेन रञ्जितानि रक्तानि तनूनि सूक्ष्माणि । सुगन्धिना सुरभिणा कालागुरुणा कृष्णचन्दनेन धूपितानि कृतसंस्काराणि वासांसि धत्ते धारयति ॥ १३ ॥

पुंस्कोकिलश्चूतरसासवेन
मत्तः प्रियां चुम्बति रागहृष्टः ।
कूजद्द्विरेफोऽप्ययमम्बुजस्थः
प्रियं प्रियायाः प्रकरोति चाटु ॥ १४ ॥

पुंस्कोकिल इति । चूतस्याम्रस्य रस एवासवं मद्यं तेन मत्तः रागेण प्रेम्णा हृष्टः सन्तुष्टः पुंस्कोकिलः प्रिया कोकिला चुम्बति । अम्बुजे कमले तिष्ठति स कूजन्मधुरध्वनिं कुर्वन् द्विरेफो द्वौ रेफौ यस्मिन् स भ्रमरशब्दो यस्य वाचकस्तादृशोऽलिः । लक्षितलक्षणाया इदमुदाहरणम् । प्रियाया भ्रमर्याः प्रियमभीष्टं चाटु मधुरभाषणं प्रकरोति । अनेन श्लोकेन कुमारसंभवस्थं "मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः " इति पद्यं स्मारितम् ॥ १४ ॥

ताम्रप्रवालस्तबकावनम्रा-

---

१ B. 'आलिप्यते' 'आलिख्यते.' २ 'साम्प्रतम्.' ३ 'प्रियाणि.' 'नितान्त.' ४ B. J. 'कामशरानुविद्धः.' ५ 'लताङ्गो' ६ B. K. 'रसेन मत्तः.' ७ B. K. 'प्रियामुखं चुम्बति सादरोऽयम्' ८ B 'गुञ्जत्.' J. गुञ्जन्' ९ 'प्रविकचप्रसक्तः' १० 'क्षिप्रम्' 'प्रिय.' ११ B 'चाटुम्' K. क्षिप्रम्' १२ B. 'प्रवालताम्र०.' प्रनम्रशाखाः.'

ताम्रप्रवालस्तबकावनम्राश्-
चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः
पर्युत्सुकं मानसमङ्गनानाम् ॥ १५ ॥

ताम्रेति । ताम्राणां रक्तानां प्रवालानां पर्णानां स्तबकैर्गुच्छैरवनम्रा नताः । पुष्पिताः संजातकुसुमा मनोहराः शाखाः स्कंधा येषां ते " तदस्य संजातं तारका-दिभ्य इतच्" इत्यनेनेतच्प्रत्यय पुष्पशब्दात् । पवनेन समीरणेनावधूताः कम्पिता-श्चूतद्रुमा आम्रवृक्षा अङ्गनानां युवतीनां मानसं काममत्यन्तं पर्युत्सुकमुत्कण्ठितं कुर्वन्ति । वसन्ते चूतमञ्जरीमवलोक्य प्रमदा उत्कण्ठिता भवन्तीत्यर्थः चूतप्रसवस्य मदनबाणत्वेनोत्कण्ठाजनकत्वं युक्तमेव ॥ १५ ॥

आ मूलतो विद्रुमरागताम्रं
सपल्लवाः पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥ १६ ॥

आमूलत इति । आमूलतो मूलादारभ्य विद्रुमस्य प्रवालस्य राग इव ताम्रं रक्तवर्णं पुष्पचयं कुसुमसमूहं दधानाः सपल्लवाः पर्णसहिता अशोका वञ्जुल-वृक्षा निरीक्ष्यमाणा दृश्यमाना नवयौवनानां नूतनतारुण्यानां प्रमदानां हृदयं मानसं सशोकं कुर्वन्ति । अशोका न शोको येभ्य ईदृशा अपि हृदयं सशोकं कुर्वन्त्य-तोऽकारणात्कार्यजन्मरूपो विभावनालंकारः । नवयौवनाः स्वयं कान्तसमीपमुप-सर्पणे भीरवोऽतस्तासां हृदयं पीडितं भवतीति भावः ॥ १६ ॥

मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितनम्रमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥ १७ ॥

मत्तेति । मत्तैरुन्मत्तैर्द्विरेफैर्भ्रमरैः परिचुम्बितानि संस्पृष्टानि चारूणि पुष्पाणि कुसुमानि यासां ताः मन्दानिलेन मृदुना पवनेनाकुलिता व्याकुलिताः पातिता इति यावत् अतएव नम्रा नता मृदुप्रवालाः कोमलपल्लवा यासां ताः बाला नवाः

---

१ 'कान्ते.' 'सान्द्राः.' २ 'पवनाभिभूताः.' ३ B 'समुत्सुकत्वं मनसः.' K. 'समुत्सुकम्.' 'पर्युत्सुकत्वं मनसः.' ४ B K. 'ताम्रा.' ५ B. K 'सपल्लवम्.' ६ B K. 'चारु' 'चारुतर.' ७ 'मनसश्च समुत्सुकत्वम्.' ८ D N. 'चूताभिरामकलिकाः' B. 'बालातिमुक्तकलिकाः.' 'चूताः विमुक्तकलिकाः.'

आलिप्यते चन्दनमङ्गनाभि-
र्मदालसाभिर्मृगनाभियुक्तम् ॥ १२ ॥

प्रियङ्गिवति । मदेनालसाभिर्जडाभिर्विलासिनीभिर्विलासवतीभिरङ्गनाभिर्युवतिभिः गौरेषु गौरवर्णेषु स्तनेषु कुचेषु प्रियङ्गुः श्यामालता कालीयकं पीतचन्दनं कुङ्कुमं काश्मीरजं तैरवतं युक्तं मृगनाभिः कस्तूरिका तयाच युक्तं चन्दनं मलयजमालिप्यते चर्च्यते। " मृगनाभिर्मृगमदः कस्तूरी " इत्यमरः ॥ १२ ॥

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः काममदालसाङ्गः ॥ १३ ॥

गुरूणीति। कामस्य मदेनालसान्यङ्गान्यस्यथवा यस्य स । कामशरानुविद्ध इति पाठे कामशरेणानुविद्धस्ताडित इत्यर्थः। जनो गुरूणि जडानि वासांसि वसनानि तूर्णं क्षिप्रं विहाय त्यक्त्वा लाक्षारसेन रञ्जितानि रक्तानि तनूनि सूक्ष्माणि सुगन्धिना सुरभिणा कालागुरुणा कृष्णचन्दनेन धूपितानि कृतसंस्काराणि वासांसि धत्ते धारयति ॥ १३ ॥

पुंस्कोकिलश्चूतरसासवेन
मत्तः प्रियां चुम्बति रागहृष्टः।
कूजद्द्विरेफोऽप्ययमम्बुजस्थः
प्रियं प्रियायाः प्रकरोति चाटु ॥ १४ ॥

पुंस्कोकिल इति। चूतरयाम्रस्य रस एवासवं मद्यं तेन मत्त रागेण प्रेम्णा हृष्टः सन्तुष्टः पुंस्कोकिलः प्रियां कोकिलां चुम्बति। अम्बुजे कमले तिष्ठति स कूजन्मधुरध्वनिं कुर्वन् द्विरेफो द्वौ रेफौ यस्मिन्स भ्रमरशब्दो यस्य वाचकस्तादृशोऽलि । लक्षितलक्षणाया इदमुदाहरणम्। प्रियायाः भ्रमर्याः प्रियमभीष्टं चाटु मधुरभाषणं प्रकरोति। अनेन श्लोकेन कुमारसंभवस्थं "मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः." इति पद्यं स्मारितम् ॥ १४ ॥

ताम्रप्रवालस्तबकावनम्रा-

---

१ B 'आलिप्यते.' 'आलिप्यते.' २ 'गात्राम.' ३ 'शिराणि.' 'नितान्त.' ४ B. J. 'कामशरानुविद्धः.' ५ 'लताङ्गः.' ६ B. K. 'रसेन मत्तः.' ७ B. K. 'प्रियामुखं चुम्बति सादरोऽयम्.' ८ B 'गुञ्जत्' J. 'गुञ्जन्' ९ 'प्यधिकप्रमत्त.' १० 'प्रियम्' 'प्रिय.' ११ B. 'चाटुम्' K. 'क्षिप्रम्' १२ B. 'मदालसाप्र॰.' '....प्रावालयवातसंगाः.'

श्चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः
पर्युत्सुकं मानसमङ्गनानाम् ॥ १५ ॥

ताम्रेति । ताम्राणां रक्तानां प्रवालानां पर्णानां स्तबकैर्गुच्छैरवनम्रा नताः। पुष्पिताः संजातकुसुमा मनोहराः शाखाः स्कंधा येषां ते "तदस्य संजातं तारका-दिभ्य इतजि"त्यनेनेतच्प्रत्यय पुष्पितशब्दात् । पवनेन मलयपवनेनावधूताः कम्पिताः चूतद्रुमा आम्रवृक्षा अङ्गनानां युवतीनां मानसं कामपरत्वं पर्युत्सुकमुत्कण्ठितं कुर्वन्ति । वसन्ते चूतमञ्जरीमवलोक्य प्रमदा उत्कण्ठिता भवन्तीत्यर्थः । चूतप्रसवस्य मदनबाणत्वेनोत्कण्ठाजनकत्वं युक्तमेव ॥ १५ ॥

आ मूलतो विद्रुमरागताम्रं
सपल्लवाः पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥ १६ ॥

आमूलत इति । आमूलतो मूलादारभ्य विद्रुमस्य प्रवालस्य राग इव ताम्रं रक्तवर्णं पुष्पचयं कुसुमसमूहं दधानाः सपल्लवाः पर्णसहिता अशोका वञ्जुल-वृक्षा निरीक्ष्यमाणा दृश्यमाना नवयौवनानां नूतनतारुण्यानां प्रमदानां हृदयं मा-नसं सशोकं कुर्वन्ति । अशोका न शोको येभ्य इत्येवं अपि हृदयं सशोकं कुर्वन्त्य-तोऽकारणात्कार्यजन्मरूपो विभावनालंकारः । नवयौवना स्वयं कान्तसमागमसुर-मर्पणे भीरवोऽतस्तासां हृदयं पीडितं भवतीति भावः ॥ १६ ॥

मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितनम्रमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥ १७ ॥

मत्तेति । मत्तैरुन्मत्तैर्द्विरेफैर्भ्रमरैः परिचुम्बितानि संस्पृष्टानि चारूणि पुष्पाणि कुसुमानि यासां ताः मन्दानिलेन मृदुना पवनेनाकुलिता व्याकुलिताः पीडिता इति यावत् अतएव नम्रा नता मृदुप्रवालाः कोमलपल्लवा यासां ताः. बाला नूतनाः

१ 'कान्ते.' 'सान्द्राः.' २ 'पवनाभिभूताः.' ३ B 'समुत्सुकत्वं मनसः' K. 'समुत्सुकम्.' 'पर्युत्सुकत्वं मनसः.' ४ B K. 'ताम्रा' ५ B. K. 'सपल्लवम्.' ६ B K. 'चारु' 'ताम्र.' ७ 'मनसश्च समुत्सुकत्वम्.' ८ D N. 'चूताभिरामकलिकाः' B. 'सा-न्तिमुक्तलतिकाः.' 'चूताः विमुक्तकलिकाः.'

अतिमुक्तालतिका वासन्तालता कुन्दविशेषाः समन्तात्मभ्रमाण दृश्यमाना सत्य कामिमनसा सहसा युगपदुत्सुकत्वमौत्सुक्यं कुर्वन्ति । चूत विमुक्तरागिण इति पाठ सुगम । चूताभिरामकलिका इति पाठोऽसमीचीन । पुष्पप्रायाया आम्र कलिकाया पुष्पान्तराभावादस्मिन्पाठे " मत्तद्विरेफपरिचुम्बितचारुपुष्पा " इति विशेषण न सङ्गच्छत ॥ १७ ॥

कान्तामुखद्युतिजुषामचिरोद्गतानां
शोभा परा कुरबकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य
कन्दर्पबाणपतनव्यथितं हि चेत ॥ १८ ॥

कान्तेति । हे प्रिये । कान्तामुखस्य प्रमदाननस्य द्युति कान्ति जुषन्ते से वन्ते तासामचिरोद्गताना नूत्नोत्पन्नानाम् । अपि चोद्गतानामिति पाठस्तु न मनोरम । कुरबकद्रुमा अम्लानवृक्षा तेषा मञ्जरीणा परा श्रेष्ठा शोभा दृष्ट्वा कस्य सहृदयस्य रसिकस्य चेतो मानस कन्दर्पस्य मदनस्य बाणाना शराणा पतनेन पातेन व्यथित पीडित न भवेदपि तु सर्वस्यापीत्यर्थ हिशब्दोऽवधार णार्थ । तेन पादपूरण इति परास्तम् । दृष्ट्वा प्रिये प्रियतमाराहतस्य । पुरा इति पाठस्तु चारुतर । अर्थस्तु सुगम । अतिमुक्तापेक्षया विमुक्तरथैर चेतोऽधिक धार्ष्ययद्दीप्सा एतेति भाव ॥ १८ ॥

आदीप्तवह्निसदृशैर्मरुतावधूतै
सर्वत्र किंशुकवनै कुसुमावनम्रै ।
सद्यो वसन्तसमये हि समाचितेयं
रक्तांशुका नववधूरिव भाति भूमि ॥ १९ ॥

आदीप्तेति । वसन्त वसन्तकाले सर्वत्र सर्व आदीप्त आभिमुख्येन ज्व-लितो वह्निरग्निस्तत्सदृशै साम्य गतै मरुता वायुनाऽवधूतै कम्पितै कुसुमै पुष्पैरवनम्रा-न्नतानि । किंशुकवनै पलाशवृक्षसमूहै समाचिता व्याप्तेय भूमि रक्त नामम-

---

१ D ' चिरोद्गतानाम् ' २ B कान्तामुखद्युतिमुषाम ' J ' कान्ताननद्युतिमुषाम ' ' कान्तामुख द्युतिमनोहरमुद्गतानाम ' ' नानामुखद्युति जुषाम चिरोद्गतानाम. कान्ताननद्युतिजुषामचिरोद्गतानाम्. ' ' कान्तामुख द्युतिनिभाम ' ३ B ' दृष्ट्वा ' ४ B ' प्रियतमाग्रहितस्य पुरा ' ' हि पथिकस्य ' ५ J, C, ' मिश्रै. ' ' पवन ' ६ ' व्यथनम ' ७ B ' गवि पार्श्वितानि ' ' पवनावधूतै , ८ ' र्वसि. ' ९ ' वसन्त कुसुमाचिता दिताम्रम १० B ' समुपागते च ' J ' समुपागते हि ' ' समाकीर्णम ' ११ ' रक्तांशुके '

[illegible] वसन्त [illegible] मा नवतरू [illegible] गतश्चात [illegible] पिता शाप । [illegible] रक्तानुरञ्जन । [illegible] । नवतरूना [illegible] दानानना नाधुनसाति भाति ॥ १९ ॥

किं किंशुकै शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न कृतं नु दग्धम् ।
यत्कोकिल पुनरयं मधुरैर्वचोभि
यूना मन सुवदनानिहितं निहन्ति ॥ २० ॥

किमिति । सुवदनाया [illegible] सुरत [illegible] निहित निवेशित यूना तरुणानां मनश्च [illegible] कारणनस्य [illegible] यैषां नं [illegible] भिन्न मपि तु भिन्नमेव । कर्णिकारस्य [illegible] पुद्रुमस्य [illegible] महाराष्ट्र भाषायाम् । कुसुमै [illegible] न कृतं नु यत्पुनरयं [illegible] मधुरैर्वचोभिः [illegible] निहन्ति । दग्धमारण [illegible] पुष्पाय [illegible] प्रसन्नतास्ताव ॥ २० ॥

पुंस्कोकिलै कलवचोभिरुपात्तहर्षैः
कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ॥ २१ ॥

पुंस्कोकिलैरिति । कलं मधुरं वचो भाषितं येषां तैः । [illegible] पुंस्कोकिलैः । उन्मदनानि उन्मदेन कलानि मधुराणि वचांसि कूजद्भिरुद्गिरद्भिः [illegible] लज्जया [illegible] अन्वितं युक्तं सविनयं विनयसहितं [illegible] कुलगृहेऽपि भर्तृगृहेऽपि [illegible] नान्यत्र [illegible] व्याकुलं कृतम् । रमणस्य [illegible] ॥ २१ ॥

आकम्पयन् कुसुमितां सहकारशाखां
विस्तारयन् परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन्नराणां
नीहारपातविगमात्सुभगो वसन्ते ॥ २२ ॥

आकम्पयन्निति । वसन्ते कुसुमिता पुष्पिता सहकारशाखा आम्रशाखा

---

१ B K न [illegible] ' २ [illegible] ' B कृत मनोभव ' K कृत मनो[illegible] कृत [illegible] कृत मनाने ' B कान्दिग ' ४ B पुनरसौ ' ' पुनरेव ' ५ B सुवदने नियत हरन्ति ' ० [illegible]हन्ति ६ K [illegible] समुपात्त[illegible] ' ७ B [illegible] वचांसि पुंसाम ' ८ [illegible]लोचनानि ' वचांसि [illegible] ९ पर्याकुले ' १० B [illegible] ताम् ' ११ B शाखाम् १ परभृतोऽस्य १३ K वधू नाम् ' १४ ' [illegible] ' १ वनेषु '

आत्मप्रपंचयन्। दिक्षु सर्वत्र परभृतस्य कोकिलस्य वचांसि कूजितानि विस्तारयन्। विपूर्वात् स्तृणातेर्ण्यन्तात् णिचि शतरि च निष्पन्नोऽयं शब्दः। नीहारस्य तुहिनस्य पातः पतनं तस्य विगमान्नाशात्सुभगो मनोहरो वायुः। हिमनाशात्सुखोऽतः सुभग इत्यर्थः। नराणां पुंसां हृदयानि हरन् विवाति विशेषेण वहति ॥ २२ ॥

कुन्दैः सविभ्रमवधूहसितावदातै-
रुद्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रागेव रागमलिनानि मनांसि यूनाम् ॥ २३ ॥

कुन्दैरिति। विभ्रमेण विलासेन सहितानि सविभ्रमाणि यानि वधूहसितानि रमणीहास्यानि तानीवावदातैः शुभ्रैः कुन्दैः कुन्दपुष्पैरुद्योतितानि प्रकाशितान्यलंकृतानीति यावत् मनोहराण्युपवनान्युद्यानानि। निवृत्तो नष्टो रागः प्रेमा यस्मात्तन्मुनेर्मननशीलस्यापि चित्तं मानसं हरन्ति। प्रागेव किमुत मुनिमनोहरणात्प्रागेव वा रागेण प्रेम्णा मलिनानि कलुषितानि यूनां तरुणानां मनांसि हरन्ति। अत्र यूनामित्यनेन विवेकराहित्यं द्योत्यते॥२३॥

आलम्बिहेमरसनाः स्तनसक्तहाराः
कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।
मासे मधौ मधुरकोकिलभृङ्गनादै-
र्नार्यो हरन्ति हृदयं प्रसभं नराणाम् ॥ २४ ॥

आलम्बीति। आलम्बिन्यो लम्बमाना हेमरसनाः सुवर्णरशनाञ्चो यासां ताः। स्तने सक्ताः लग्ना इति यावद्धारा यासां ताः। कंदर्पस्य मदनस्य दर्पेणोष्मणा शिथिलीकृता विलुलिता गात्रयष्टयः शरीरयष्टयो यासां ताः। "दर्पो मृगमदे गर्वे कुसुमे केवरेऽपि। वाष्प ऊष्माश्रुजलयो" इति हेमचन्द्रः। नार्यः प्रमदा मधौ चैत्रमासे। "मधु पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे। वसंतदैत्यभिच्चैत्र" इति मेदिनी। नराणां हृदयं मधुरैर्मनोहरैः कोकिलानां पिकानां भृङ्गाणां मधुपानां नादैर्ध्वनिभिर्हरन्त्याकर्षन्ति ॥ २४ ॥

नानामनोज्ञकुसुमद्रुमभूषितान्तान्
हृष्टान्यपुष्टनिनदाकुलसानुदेशान् ।

१ 'मंशोभितानि.' २ 'निरस्तरागम.' ३ B. 'प्रायेण.' K. 'प्रायेण रागमलिनानि.' ४ 'मानसिकानि.' ५ J. K. 'पुंसाम.' ६ 'आलम्बि.' 'आलम्ब्य चन्दनरसान्.' 'आलम्बचन्दनरसाः.' ७ 'प्रस.' ८ 'कोमल.' ९ 'नादैः.' १० 'नमाः' ११ 'मुगुमो-त्कमधुभितान्तान्.' १२ K. 'भूषितामान्.' B. 'पुष्पितामान्.' 'पवनाग्रान्' १३ B. 'पुष्पोल्लसितसानुदेशान्.' १४ 'संभेदसान्.'

शैलेयजालपरिणद्धशिलातलौघान्
दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः ॥ २५ ॥

नानेति । सर्वो जनो नाना नानाजातीया मनोज्ञा मञ्जुलाः कुसुमद्रुमाः पुष्पवृक्षास्तैर्भूषिता अलंकृता अन्ताः प्रान्तभागा येषां तान् । हृष्टा आनन्दिता ये-ऽन्यपुष्टाः परभृतास्तेषां निनदेन शब्देनाकुलाः सानुदेशाः प्रस्थदेशा येषां तान् । शैलेयानां तालपर्णीलतानां जालेन समूहेन परिणद्धा व्याप्ताः शिलातलानामोघाः समूहा येषां तान् । "शैलेयं तालपर्ण्यां चे" ति मेदिनी । अथवा शैलेयानां शिलापुष्पाणां जालेनेत्यर्थः । " कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु । शैलेय" मित्यमरः । क्षितिभृतः पर्वतान् दृष्ट्वा मुदं प्रीतिमेति गच्छति । आनन्दं लभत इत्यर्थः ॥ २५ ॥

नेत्रे निमीलति विनेदिति याति मोहं
घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्तवृत्ति-
र्दृष्ट्वाऽध्वगः कुसुमितान्सहकारवृक्षान् ॥ २६ ॥

नेत्रइति । कान्ताया भार्याया वियोगेन विश्लेषेण परिखेदिता खेदयुक्ता चित्तवृत्तिर्यस्य सः । अध्वगः पान्थः कुसुमितान् पुष्पितान् सहकारवृक्षानाम्रद्रुमान् दृष्ट्वा वीक्ष्य नेत्रे निमीलति संकोचयति । तावदं वृक्षदर्शनं परिहर्तुमिति भावः । विरौदिति क्रन्दति । पीडामसहमानो रोदनं करोति । मोहं याति गच्छति । घ्राणं नासिकां करेण निरुणद्धि शिरःशूलजनकः सुवासो न घ्राणं प्रविशत्विति नासिकासंरोधोऽस्यार्थः । उच्चैश्च विरौति उच्चैरारटतीत्यर्थः । अत्र रोदितीत्यनेनामंगलाश्लीलव्यञ्जकत्वा दुष्टमिदं पद्यं । मृदुपवनविभिन्नो मत्प्रियाया विनाशादिति वादिनि ज्ञेयम ॥ २६ ॥

समदमधुकराणां कोकिलानां च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यैः ।
इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां
तुदति कुसुममासो मन्मथोद्दीपनाय ॥२७॥

---

१ 'जानु' २ B. 'तलान्तान्.' 'तलाश्च.' K 'गुहान्तान्.' 'गृहान्तान्.' ३ 'मदमेति.' ४ 'समुपैति सर्वान्.' ४ B. G. J. N. 'निर्मीलयति रोदिति.' ५ J. N. 'याति शोकम्.' 'ज्ञानमोहान्.' ६ 'प्राणान्.' 'प्राणान् करेण च निरुन्ध.' ७ 'देविन.' ८ B. 'जनः.' 'नरः.' 'नगे.' ९ 'कुसुमिताः सहकारशाखाः.' 'कुसुमितान् सहसैव चूतान.' १० B. J. 'रम्यैः.' ११ B. 'कामिनीनाम्.' १२ 'कुसुमचापः.' K. 'कुसुमबाणः' १३ J. N. 'थोद्वेजनाय.' 'थोत्तेजनाभिः.'

समदेति । रम्या मनोहरा कुसुममासो वसन्तसमयः । मदेन गर्वितानामुन्मत्तानां मधुकरगणानां भ्रमराणां कोकिलानां च नादैः कूजितैः । कुसुमिताः पुष्पिताः सहकारा आम्रवृक्षास्तैः कर्णिकारैश्च । सुतीक्ष्णैर्निशितैरिषुभिरिव बाणैरिव मानिनीनां मानवतीनां मानसं मन्मथोद्दीपनाय मदनवर्धनाय तुदन्ति व्यथयन्ति । यद्वा रमणसमीपोपसर्पणेऽनादरवतीनामानिनीनां मानसं पीडयन्ति । तासां योगमयुक्तत्वा करोत्ययं ॥ २७ ॥

इतोऽग्रे क्षेपका नव श्लोकाः केषुचिदादर्शपुस्तकेषूपलभ्यमाना पूर्वटीकाकृद्भिरव्याख्याता अपि छात्रसौलभ्याय व्याख्यायन्ते । एतेषां कविकृतित्वे महान् सन्देहः स च रसिकानां श्लोकावलोकनेन एव व्यक्तो भवेत् ।*

रुचिरकनककान्तीन्मुञ्चतः पुष्पराशीन्
मृदुपवनविधूतान्पुष्पिताँश्चूतवृक्षान् ।
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे
मदनशरनिघातैर्मोहमेति प्रवासी ॥ १ ॥

रुचिरेति । रुचिरं मनोहरं कनकमिव सुवर्णमिव कान्तिर्यस्य तान् पुष्पराशीन् कुसुमचयान्मुञ्चतस्त्यजतः । मृदुना पवनेन वायुना विधूतान् कम्पितान् कुसुमितांश्चूतवृक्षानाम्रान् अभिमुखं सम्मुखमभिवीक्ष्यावलोक्य क्षामदेहोऽपि कृशदेहोऽपि

---

* This and the following eight verses are generally considered as interpolations which on the face of them they appear to be B prints verses 1, 2, 3, 4, 5, 6 and 8 in the regular text and numbers them as if they were the work of Kalidasa B also prints verses 7 and 9 but they are printed in his notes J admits none of these in his text N prints as interpolations after verse 27 of the text all of these verses except 8 G prints them all as additional verses in his appendix and his arrangement coincides with ours except that verse 7, according to him follows verse 9 of the text J 2 prints 1, 2, 3, 4, 5, 6, 7 and 9 in the text after verse 28 and numbers them from 30 to 37

1 B G 'कान्तम' 2 B G 'वृक्षम' 3 B G 'पुष्पितः'

प्रवासी पान्थ । मार्ग ग्ध्याया मदनशरनिपातैर्मन्मनवाणताडनैर्मोह मूर्च्छामेति अत्र पुष्पशरान् मुञ्चन् इति विशेषणयोग पुष्पितानिति पुनरुक्तमपिपदास्वारस्य चानो नेय कालिदासकृति ॥ १ ॥

परभृतकलगीतैर्ह्लादिभि सद्वचासि
स्मितदशनमयूखान् कुन्दपुष्पप्रभाभि ।
करकिसलयकान्ति पल्लवैर्विद्रुमाभै
रभिभवति वसन्त कामिनीनामिदानीम् ॥ २ ॥

परभृतेति । वसन्त कामिनीना सद्वचासि सुभाषणानि ह्लादिभिर्मनोहरैः परभृताना कोकिलाना कलगातैर्मधुरगायनै स्मितस्य हास्यस्य दशनस्य च मयूखान् किरणान् कुन्दपुष्पप्रभाभि कुन्दकुसुमकान्तिभि । करकिसलयस्य कान्ति शोभाम् । विद्रुमाभै प्रवालसदृशै पल्लवैः किसलयैरभिभवति निरस्करोति पराजयत इत्यर्थ अत्र स्मितदशनयो शुभ्रत्वेन कुन्दपुष्पै परिभवो योग्य एव दन्तस्य कुन्दपुष्पाकारत्वाच ॥ २ ॥

कनककमलकान्तैराननै पाण्डुगण्डै
रुपरिनिहितहारैश्चन्दनार्द्रै स्तनाग्रै ।
मदनजनितलासै सालसैर्दृष्टिपातै
र्मुनिवरमपि नार्य. कामयन्ते वसन्ते ॥ ३ ॥

कनकेति । पाण्डू पाण्डुरौ गण्डौ कपोलौ येषा तै । कनककमलमिव सुवर्णपद्ममिव कान्तै सुन्दरैराननैर्मुखै । उपरि निहिता स्थापिता । हारा मुक्तामाला येषु तै । चन्दनेन मलयजेनार्द्रै स्तनाग्रै कुचाग्रै । मदनेन कामेन जनित. उत्पादितो लासो नृत्य येषा तै सालसैर्दृष्टिपातैर्दृष्टिप्रक्षेपैरुपलक्षिता । सर्वत्रेत्थ भूतलक्षणे तृतीया । नार्य प्रमदा वसन्ते मुनिवरमपि मदनरत्तान्मानमिक्षमपि कामयन्त इच्छन्ति । एतद्दश कामिन्यो मदनव्यतिकररहितमपि मुनि प्रार्थयमाना स्वमदनपीडाधिक्य व्यञ्जयन्तीति भाव ॥ ३ ॥

मधुसुरभिमुखाब्ज लोचने लोलतारे
नवकुरवकपूर्ण केशपाशो मनोज्ञ ।
अतिगुरु कुचयुग्मं श्रोणिबिम्ब तथैव
न भवति किमिदानी योषितां मन्मथाय ॥ ४ ॥

---

१ B G 'मयूखम्' २ N 'उपहसति' ३ B G 'उपनिहितसुहारै' ४ 'स्तनान्तै' ५ N 'मदनजनितविलासैर्दृष्टिपातैर्मुनीन्द्रान्' ६ N स्तनभरनतनार्य कामयन्ति प्रशान्तान्' ७ N लोलताक्षे' ८ N 'गुरुतर' ९ N. 'मन्मथाय'

मधिवानि । मधुना मद्येन सुरभि सुगन्धि मुखाब्जम् अब्जमिव पद्ममिव मुखं मुखपद्ममिति व्याघ्रादिभिः सामान्याप्रयोग इत्युपमितसमासः । न चात्र सुरभिरूपसामान्यस्य सत्त्वात्कथं तेन समास इति वाच्यम् । नायमुपमानोपमेययोः सामान्यधर्मः स धर्मश्च शमनायतरमेव । लोले चपले तारे कनीनिके ययोस्ते लोचने नेत्रे । नवैर्नूतनैः कुरबकैः कुरबकपुष्पैः पूर्णोऽतएव मनोज्ञो मनोहरः केशपाशः अतिगुर्वतिमहत् कुचयुगं स्तनद्वन्द्वं तथैव महच्छ्रोणिबिम्बम् । स्त्रीणामस्मिन्वसन्ते यौवनवतां प्रमदानां किं चारु न भवति ब्रूहि । सर्वमेव चारु भवतीति प्रत्युत्तरम् ॥

आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
उत्कूजितैः परभृतस्य मदाकुलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतशब्दैः ॥ ५ ॥

